RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
तेषामेवानुकम्पार्थमह-
मज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन
भास्वता ॥
भगवद्गीता-अध्याय10, श्लोक 11

नमः शिवाभ्यां पशुपालकाभ्यां
जगत्त्रयीरक्षणबद्धहृद्भ्याम् ।
समस्तदेवासुरपूजिताभ्यां नमो नमः
शङ्करपार्वतीभ्याम् ॥12॥
उमामहेश्वरस्तोत्रम्

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
यथागारं दृढस्थूणं जीर्णं
भूत्वावसीदति।
तथावसीदन्ति नराः
जरामृत्युवशं गताः ॥
( वा. रामायण, अयो. 105/18 )

क्वासे क्व च गमिष्यामि
कोऽन्वहं किमिहास्थितः।
कस्मात् किमनुशोचेयम्
इत्येवं स्थापयेन्मनः॥
महाभारत, शान्ति पर्व - २८/४०

卐 वर्षम्-१४ 卐 अंकः-१७ ( ३२९ ) नवदेहली 卐 १ मार्चमासः २०२५तः १५ मार्चमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## विद्या चैतन्यप्रवृत्त्या उत्कृष्टा भविष्यति - आचार्यः बालकृष्णः

### योगः चरित्रस्य निर्माणम् अस्ति - साध्वी-देवप्रिया

हरिद्वारम्। पतञ्जलिविश्वविद्यालयस्य वार्षिकमहोत्सव 'अभ्युदय' अन्तर्गतायाः आयोजित 'खेल-योगासन' प्रतियोगितायाः अन्तिमपक्षस्य भव्य उद्घाटन समारोहः सम्पन्नः। अवसरेऽस्मिन् पतंजलिविश्वविद्यालयस्य माननीयः कुलपतिःआचार्य बालकृष्णः दीपं प्रज्वाल्य प्रतियोगितायाः उद्घाटनं कृतम् ।



अस्मिन् अवसरे पतञ्जलिविश्वविद्यालयस्य कुलपतिः आचार्य बालकृष्णः प्रतिभागिनां प्रशंसां कुर्वन् अवदत् यत् विश्वविद्यालयस्य छात्रैः राष्ट्रियस्तरस्य योगासनक्रीडायां उत्कृष्टप्रदर्शनेन पतञ्जलिसंस्थानं गौरवपूर्णं कृतम्। सः छात्रान् राष्ट्रियस्तरस्य योगक्रीडास्पर्धासु उत्तमं प्रदर्शनं कृत्वा अभिनन्दितवान्। सभागारे उपस्थितजनानाम् सूचनां दत्त्वा सः अवदत् यत् अद्यैव राष्ट्रियक्रीडायां पतञ्जलिविश्वविद्यालयस्य छात्राणां कृते योगासनक्रीडाप्रतियोगितायाः कृते २ स्वर्णपदके, ३ रजतपदकानि, १ कांस्यपदकं च प्राप्तानि। एतैः पदकैः उत्तराखण्डराज्यं पदकदृष्ट्या राष्ट्रियस्तरस्य सप्तमस्थानं प्राप्तवान् अस्ति । छात्रान् सम्बोधयन् आचार्य

शेषभागःद्वितीयेपुटे

## शैवपरम्परायां वास्तुशास्त्रस्य तत्त्वानि गवेषणायाः विषयः- प्रो.काशीनाथः न्योपाने

डॉ.दिनेश चौबे, उज्जयिनी

विक्रमोत्सवस्य अन्तर्गतं महाराजविक्रमादित्यशोधपीठम् तथा च वास्तुविभागः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी इत्यनयोः संयुक्ताश्रयेण २७ फरवरी २०२५ तमेदिनाङ्के




पाणिनिसंस्कृत विश्वविद्यालयपरिसरे 'शैवपरम्परायां वास्तुशास्त्रस्य अवधारणा' इति विषयमवलम्ब्य द्विदिवसीया अन्ताराष्ट्रियशोधसङ्गोष्ठी आयोजिता। उद्घाटनसमारोहे मुख्यातिथिरूपेण आचार्यः काशीनाथन्योपानेमहोदयः,

शेषभागःतृतीयेपुटे

## व्याकरणं सर्वेषु शास्त्रेषु पवित्रतमं सर्वशास्त्रोपकारकं च वर्त्तते-आचार्यः राधावल्लभत्रिपाठी

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य व्याकरणविभागेन नवदेहलीस्थ केन्द्रीयसंस्कृतविश्वविद्यालयस्य आर्थिकसहयोगेन १९ फरवरी तः २५ फरवरी २०२५ दिनाङ्कं यावत् सप्तदिवसात्मिका राष्ट्रियशास्त्रार्थप्रशिक्षणकार्यशाला आयोजिता आसीत्। कार्यशालायाः उद्घाटनं १९ फेब्रुवरी २०२५ तमेदिनाङ्के विश्वविद्यालयपरिसरे अभवत् । आचार्यभर्तृहरिप्रणीतवाक्यपदीयस्य



साधनसमुद्देशाधारितायाः कार्यशालायाः उद्घाटनसत्रे मुख्यातिथिरूपेण केंद्रीयसंस्कृत विशवविद्यालयस्य (प्राक्तन् राष्ट्रियसंस्कृतसंस्थानं,नवदेहली) इत्यस्य कुलपतिचराः प्रसिद्धसाहित्यकाराः, राष्ट्रपतिसम्मनिताः आचार्यराधावल्लभत्रिपाठीवर्याःउपस्थिताः आसन् । आचार्यैः स्ववक्तव्ये भाषाप्रकृतेः तथा च बाह्यजगतोपरि आस्याः प्रभावस्य विषये उक्तं यत् आचार्यभर्तृहरिमते शब्दः शाश्वतः ब्रह्मप्राप्त्यर्थं मुख्यसाधनभूतं च अस्ति। तैः विश्वस्य अनेकेषां दार्शनिकानां पाश्चात्यविद्वान् चाऊंसकी इत्यादीनां मतं प्रकाशयन् कथितम् आचार्यभर्तृहरेः पूर्वं केनापि भाषाविदैः एतादृशं मतं न प्रतिपादितम् । विद्वतवर्यैः सर्वशास्त्राधारं व्याकरणम् इति स्वीकृतम्। उद्घाटनसमारोहस्य अध्यक्षाः, माननीयकुलगुरवः आचार्यविजयकुमारसीजी महोदयाः उक्तवन्तः यत् आचार्यभर्तृहरिः महान्तः दार्शनिकाः भाषातत्वज्ञाः च आसन्। तेषां वाक्यपदीयग्रन्थः भाषादर्शनत्वेन सम्पूर्णे विश्वे प्रसिद्धः अस्ति । अस्मिन् खण्डत्रयेषु लौकिकमलौकिकं च प्रतीतिः, शब्दः, स्फोटः, स्फुरणं, परिणामः च अत्र विस्तरेण प्राप्यते। विशेषातिथिवर्यैः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य आचार्यैः डॉ. प्रदीपकुमारपाण्डेयमहोदयैः वाक्यपदीयस्य काण्डत्रयस्य परिचयः, व्याकरणस्य सिद्धान्तानां दर्शनिकं महत्त्वं च प्रकाशितम् । राष्ट्रियसंस्कृतविश्व विद्यालयः, तिरुपतितः सम्प्राप्तैः व्याकरणविभागप्रमुखैः कार्यशालाप्रशिक्षकैः च आचार्य पंकजव्यासमहोदयैः उक्तं यत् भर्तृहरिः भारतीयज्ञानपरम्परायाः प्रवर्तकाः सम्पोषकाः च आसन्। तैः प्रतिभा प्रमाणरूपेण स्वीकृताः प्रतिभाभेदाः च व्याख्याताः।

प्रस्तावना, अतिथिपरिचयः च कार्यशालासंयोजकैः व्याकरणविभागप्रमुखैः डॉ. अखिलेशकुमारद्विवेदीमहोदयैः प्रस्तुतः। कार्यशालायाः सञ्चालनं सहसंयोजकैः डॉ.दिनेशचौबेवर्यैः आभारं च विभागसंयोजकैः आचार्यतुलसीदासपरौहामहोदयैः प्रस्तुतम् ।कार्यशालायां त्रिंशत् छात्राः शास्त्रप्रशिक्षणं प्राप्तवन्तः।

## सर्वज्ञानाधारःभगवान्छिवः-डॉ. ऋषिराज पाठकः

डॉ.दिनेश चौबे, उज्जयिनी



उज्जयिनीस्थमहर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालस्य वेदविभागेन २४ फरवरी २०२५ तमे दिनाङ्के आभासीयमञ्चद्वारा संस्कृतसाहित्ये शिवः इति विषये विशेषव्याख्यानस्य आयोजनं कृतम्। तत्र नवदेहलीस्थ श्यामप्रसादमहिलामहाविद्यालयस्य संस्कृतविभागस्य सहयकाचार्यः डॉ. ऋषिराजपाठकः मुख्यबक्तारुपेण शिवरूपस्य व्याख्यानं कुर्वन् अवदत् यत् भगवान् शिवः ज्ञानदेवः सर्वविद्या-प्रवर्तकः च सः सर्वकला-सम्पन्नः मंगलशक्तिसंयुक्तरूपः अस्ति। महोदयेन महामृत्युञ्जयमन्त्रं व्याख्याय मोक्षप्राप्त्यर्थं च उपायः अवदत्। कार्यक्रमस्य संरक्षकः माननीयः कुलगुरुः आचार्यः विजयकुमारसीजीमहोदयः लोककल्याणकारी विषयोपरि विशिष्टव्याख्यानस्य आयोजनाय वेदविभागस्य अभिनन्दनं कृतवान् । अध्यक्षीय उद्बोधने वेदविभागप्रमुखेन डॉ. संकल्पमिश्रमहोदयेन श्रुतेः पुराणपर्यन्तं लोकसाहित्ये च भगवतः शिवस्य रूपस्य वर्णनं कृतम्।

अतिथिपरिचयः डॉ. सत्यव्रतपाण्डेयेन, संचालनं डॉ. प्रणवकश्यपेन, आभारं च डॉ. अंकितशाण्डिल्येन निवेदितम् । कार्यक्रमे डॉ. तुलसीदासपरोहा, डॉ. अखिलेशकुमारद्विवेदी अन्ये विद्वांसः , छात्राः, सामाजिकजनाः च सम्मिलिताः अभवन्।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे सम्पन्ना एकदिवसीया राष्ट्रियसंगोष्ठी

१८-०२-२०२५ तमे दिनाङ्केकेन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे पुराणेतिहासविद्याशाखा तथा च हिन्दु-अध्ययनकेन्द्रम् इत्यनयोः मिलिततत्त्वावधानेनायोजिताएकदिवसीया राष्ट्रियसंगोष्ठी । एतस्याः संगोष्ठ्याः विषयः आसीत् - "काशी-काञ्चीसेतुरूपः महर्षिरगस्त्यः"।

अस्याः संगोष्ठ्याः संरक्षकाः सन्ति केन्द्रीयसंस्कृतविश्वविद्यालयस्य मान्याः कुलपतयः प्रो. श्रीनिवासवरखेडिमहोदयाः। उद्घाटनसत्रे सभापतित्वेन विराजमानाः आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरस्य निदेशकाः प्रो.बनमालीबिश्वालमहाभागाः। तत्र मुख्यवक्तृरूपेण उद्बोधितवन्तः श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य न्यायविद्याशाखायाः अध्यक्षाः प्रो.जि.जयमाणिक्य-शास्त्रिणः।तथैव विशिष्टातिथिरूपेण विराजमाना आसीत् सङ्कल्प-फाउंडेशन ट्रस्ट् इत्यस्याः संस्थायाः संस्थापिका श्रीमती





सुचरिता जेना। कार्यक्रमस्यास्य मुख्या संयोजिका आसीत् पुराणेतिहासविद्याशाखाप्रमुखा प्रो.मिनतिरथः। तथैव कार्यक्रमस्य सह-संयोजकःआसीत् हिन्दु-अध्ययनकेन्द्रस्य समन्वयकः डॉ.सन्दीपचटर्जी। उद्घाटनसत्राद् आरभ्य सम्पूर्तिसत्रं यावत् संगोष्ठीयं केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरस्य जयदेवसभागारे आयोजिता आसीत्। आदौ छात्रेण रुद्रप्रसादरथेन वैदिकमङ्गलाचरणं प्रस्तुतम्। तदनु अतिथिभिः प्रदीपप्रज्ज्वालनपूर्वकं देवपूजनं विहितम्।देवपूजनात् परं केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलगीतमनुष्ठितमासीत्ततःपरं विभागीयच्छात्रैः स्वागतगीतं प्रस्तुतम्। स्वागतगीतात्परं कार्यक्रमस्यास्य संयोजिका प्रो.मिनतिरथमहोदया प्रास्तविकं स्वागतभाषणञ्च प्रस्तुतवती।स्वागतभाषणात्परं क्रमः आसीत् अतिथीनां सम्माननस्य। आदौ मुख्यवक्तुः प्रो. जी.जयमाणिक्यशास्त्रिणः सम्माननं निदेशकैः तथा विभागाचार्यैः विहितम्। ततःपरं सङ्कल्प-फाउंडेशन-ट्रस्ट् इत्यस्याः संस्थायाः संस्थापिकायाः सुचरितजेनामहोदयायाः सम्माननं कृतम् आचार्यैः। कार्यक्रमस्यास्य विशिष्टवक्तारः प्रो.जी.जयमाणिक्यशास्त्रिणः संगोष्ठ्याः विषयमाश्रित्य स्वविचारान् उपस्थापितवन्तः। संगोष्ठ्याः विषयोव्यापकः आसीत् तथापि आचार्यैः समीचीनरीत्या समासेन सर्वोऽपि विषयः उपस्थापितः। ततः परं अस्यैव परिसरस्य साहित्यविद्याशाखायाः आचार्याः प्रो. सुशान्तकुमाराजमहाभागाः एनं विषयमधिकृत्य विशिष्टमभिभाषणम् उपस्थापितवन्तः। ततःपरं धर्मशास्त्रविद्याशाखायाः प्रमुखाः वरिष्ठाचार्याः प्रो. ललितकुमारसाहुमहाभागाः स्वविचारान् उपस्थापितवन्तः। अन्ते च स्वकीयेऽध्यक्षीयभाषणे परिसरस्यास्य निदेशकाः महान्तः विद्वांसः आशुकवयः प्रो. बनमालीबिश्वालमहोदयाः संगोष्ठ्याः केन्द्रीयविषयमधिकृत्य वैज्ञानिकदृष्ट्या सारगर्भकं व्याख्यानं प्रदत्तवन्तः। ततःपरं सत्रस्यास्य परिसमाप्तिः धन्यवादज्ञापनेन सञ्जाता। पुराणेतिहास-विद्याशाखायाः आचार्याः डॉ. कृष्णचन्द्रकविमहाभागाः धन्यवादज्ञापनम् अकुर्वन्।

अस्याः संगोष्ठ्याः द्वितीयसत्रे शोधार्थिनः तेषां शोधपत्राणि उपस्थापितवन्तः। आहत्यत्रिंशत्-शोधच्छात्राः अस्यां संगोष्ठ्यां पत्रवाचनमकुर्वन्। शोधार्थिनां पत्रवाचनेन संगोष्ठीयं सफलतां प्राप्तवती। अन्ते तेषां समेषां शोधार्थिनां कृते प्रमाणपत्राणि प्रदत्तानि। सम्पूर्णस्यास्य कार्यक्रमस्य सञ्चालनमकरोत् केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरस्य हिन्दु-अध्ययनकेन्द्रस्य समन्वयकः डॉ.सन्दीपचटर्जी। एवञ्च संयोजनं कृतवती पुराणेतिहासविद्याशाखायाः वरिष्ठाचार्या प्रो.मिनतिरथमहोदया। शान्तिमन्त्रेण कार्यक्रमस्यास्य परिसमाप्तिर्जाता।

प्रथमपुटस्य शेषभागः **विद्या चैतन्यप्रवृत्त्या उत्कृष्टा...**

बालकृष्णः अवदत् यत् जीवने उत्कृष्टतां प्राप्तुं निरन्तरशिक्षणस्य, चेतनायाः च भावः अत्यावश्यकः अस्ति, यथा पतञ्जलिसंस्था अद्यत्वे अखण्डैः प्रचण्डैः च प्रयत्नैः वैश्विकमञ्चे दृश्यते।

उद्घाटनसमारोहस्य विशेषातिथिः अन्तारा स्ष्ट्रियप्रतिष्ठितः प्रसिद्धः बांसुरीवादकः डॉ. मुस्तफा हुसैनः योगे ध्याने च सङ्गीतस्य महत्त्वं विस्तरेण अवदत्। सः अवदत् यत् सङ्गीतं विशेषतः वाद्यसङ्गीतं मानसिकं शान्तिं ददाति, योगस्य अभ्यासं च गभीरं करोति। अस्मिन् अवसरे सः वेणुवादनेन रामायणस्य केचन श्लोकाः प्रस्तुतवन्तः येन सम्पूर्णं सभागारं मुग्धं जातम् ।

धन्यवाद ज्ञापन करते हुए पतंजलि विश्वविद्यालय के डीन एवं वार्षिक समारोहस्य समन्वयकः प्रो. छात्राणां प्रस्तुतिम् अद्भुतम् इति वर्णयन् साध्वी देवप्रिया अवदत् यत् पतञ्जलिस्य छात्रैः योगः स्वजीवनस्य अभिन्नः भागः कृतः, येन तेषां चरित्रस्य विकासे अपि च मानवीयमूल्यानां विकासे अपि साहाय्यं भवति।

अस्मिन् अवसरे पतंजलि योगपीठस्य क्रय समितेः अध्यक्षा सिस्टर अंशुलः, संचार विभागाध्यक्षः भगिनी पारुलः, पतंजलि विश्वविद्यालयस्य कुलपतिः प्रो. मयंक कुमार अग्रवालः, दूरस्थ शिक्षा निदेशकः डॉ. सत्येन्द्र अग्रवालः, लेखाकारः आलोक कुमार सिंहः, परीक्षा नियंत्रकः डॉ. ए. सिंहः, डीन स्वामी आर्षदेवः, 'खेल एवं योग' प्रतियोगितायाः संयोजकः डॉ. भागीरथी डॉ. आरती पालश्च इत्येभिः सहितस्य विश्वविद्यालयस्य सर्वे प्रशासनिक अधिकारिणः, विभागाध्यक्षः अथ संकाय सदस्याश्च उपस्थिताः। कार्यक्रमे पतंजलि आयुर्वेद महाविद्यालयस्य प्राचार्यः डॉ. अनिल कुमारः, उप प्राचार्यः डॉ. गिरीशः आदयो गणमान्यजनाः उपस्थिताः आसन्।

# मातृभाषादिवसस्य उपलक्ष्ये पञ्चदिवसीयसाहित्योत्सवस्य आयोजनम्

पटियालास्थिते पञ्जाबी-विश्वविद्यालये मातृभाषादिवसस्य उपलक्ष्ये पञ्चदिवसीयसाहित्योत्सवस्य आयोजनं जायमानमस्ति। अस्मिन् कार्यक्रमे संस्कृतभाषायाः प्रचाराय प्रसाराय च जनान् आकर्षयितुं 'साईस इन संस्कृत' इत्यस्य प्रदर्शिन्याः व्यवस्थापि कृतास्ति । संस्कृतभारती पञ्जाबप्रान्तः संस्कृत-पालि-विभागस्य च




अध्यक्षेन डॉ. वीरेन्द्रकुमारवर्येण सूचितं यत् संस्कृतभारती पञ्जाबः, संस्कृत-पालि-विभागः इत्यनयोः संयुक्ततत्त्वावधाने कार्यक्रमस्थले संस्कृतविज्ञानप्रदर्शिनी, संस्कृतवस्तुप्रदर्शिनी साहित्यविक्रयकेन्द्रञ्च स्थापितमस्ति।

अध्यक्षवर्येण उक्तं यत् अस्यां प्रदर्शिन्यां अस्माकं भारतीयज्ञानपरम्परायाः वैशिष्ट्यं प्रदर्शितमस्ति। अत्र प्रत्येकं वैज्ञानिकसन्दर्भस्य श्लोकं दत्त्वा पुनः तस्य अर्थः आङ्गलभाषायां हिन्दीभाषायां च उद्धृतम् अस्ति। संस्कृतप्रेमिजनानां कृते अपि अयं उत्तमः अवसरः वर्तते यत् स्वरुच्यानुगुणं पुस्तकानि चित्वा तस्य क्रयणं कर्तुं शक्नुवन्ति। साहित्यविक्रयकेन्द्रे प्रत्येकेन विषयेण सम्बन्धितानि संस्कृतपुस्तकानि उपलब्धानि सन्ति। अस्मिन् कार्यक्रमे व्यवस्थायां स्वसेवकत्वेन संस्कृत-पालि-विभागस्य अध्यापकाः, छात्राः एवं संस्कृतभारत्याः विस्तारकः विस्तारिका च संलग्नाः सन्ति।

# उत्तरप्रदेशसंस्कृतसंस्थाने सरलसंस्कृतभाषाशिक्षक-प्रशिक्षणस्यारम्भः

(वार्ताहरः-प्रवेशकुमारशुक्लः, लखनऊ)। उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चाल्यते 'गृहे गृहे संस्कृमित्योजनान्तर्गते दशदिवसीयं सरलसंस्कृतभाषाशिक्षकप्रशिक्षणकार्यक्रमस्य प्रारम्भः ०२/०३/२५ तः ११/०३/२५ पर्यन्तमेतत् कार्यक्रमः समायोजयिष्यते । कार्यक्रमस्यास्य समुद्घाटनं शनिवासरे




सायंकाले अनिष्ठितम् उत्तरप्रदेशसर्वकारस्य सहयोगेन सम्पूर्णोत्तरप्रदेशे उत्तरप्रदेशसंस्कृतसंस्थानेन द्वारा विविधाः योजनाः प्रचाल्यन्ते। उद्घाटनसत्रे प्रप्रथमं जगद्व्यापनीं देवीं सरस्वतीं समर्च्य संस्थानस्य स्वागतगीतं प्रशिक्षिका कृतिमहोदया गीतवती, वैदिकमंगलाचरणं अमितपाण्डेयः , लौकिकमंगलाशासनं दीपिकामिश्रा कृतवती,गृहे गृहे संस्कृतमिति योजनायाः समन्वयकाः डा० अनिलगौतमवर्याः आगतानामतिथीनां स्वागतभाषणेन माल्यार्पणेन च स्वागतम् कृतवन्तः ।

संस्थानगीतं प्रशिक्षिका आस्थाशुक्लामहोदयाः कारितवत्यः , संस्थानस्य निदेशकाः विनयश्रीवास्तवमहोदयाः स्वाशीर्वचनैः प्रशिक्षुकान् प्रचोदितवन्तः। प्रशिक्षणसमन्वयकः धीरजमैठाणीमहोदयः कार्यक्रमस्योद्देश्यं किमिति सर्वान् बोधितवन्तः। आध्यक्षीयपदमलङ्कृताः संस्थानस्य प्रशासनिकाधिकारिणः डा० जगदानन्दझावर्याः अध्यक्षीयमुद्बोधनं प्रदत्तवन्तः। धन्यवादज्ञापनं योजना प्रभारी भगवानसिंहचौहानमहोदयः ज्ञापितम्। नटीवत्कुशलमंचसंचालनं प्रशिक्षणसमन्वयिका राधाशर्मामहोदया कृतवत्यः। अन्तिमे समुद्घाटनसत्रस्य सम्पूर्तिः शान्तिमन्त्रेण प्रशिक्षुः नैंसगौतममहोदया कारितवती।

# वृष्टिनिमित्तस्य मेघस्य मासिकस्वरूपम्

-डॉ. लक्ष्मीकान्तविमलः

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन नवदेहलीस्थितेन फरवरीमासस्य २८ तमे दिनांके शुक्रवासरे सायंकाले ५-७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन 'कादम्बिनी : मासिकाध्यायविमर्शः' इति नाम्ना राष्ट्रिया संगोष्ठी आयोजिता आसीत्। अस्मिन् मासे कादम्बिनीग्रन्थस्य मासिकाध्यायः निर्धारितविषयः वर्तते। तं ग्रन्थांशं स्वीकृत्य इयं राष्ट्रिया संगोष्ठी प्रवृत्ता जाता।

काशी-हिन्दू-विश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसंकायस्य आचार्याः प्रो. गिरिजाशंकरशास्त्रिमहोदयाः कार्यक्रमस्य अध्यक्षा आसन्। तैः स्वकीये अध्यक्षीयवक्तव्ये ग्रन्थांशस्य समावेशः कृतः। तैः उक्तं यत् कादम्बिनीग्रन्थे प्रतिमासं मेघस्य गर्भधारणस्य लक्षणं वर्णितम् अस्ति। ग्रन्थकारः पं. ओझामहोदयः लिखति यत् कार्तिकमासे नक्षत्रस्थितितो मेघवर्षणस्य लक्षणं विचारितम। कार्तिकमासे शुक्लपक्षे द्वितीयायां तिथौ उत तृतीयां तिथौ वर्षाः भवन्ति तर्हि भाविवर्षकाले अत्यधिकाः वर्षाः भवन्ति, इति अनुमीयन्ते। यदि द्वयोः तिथिकालयोः वर्षाः न सन्ति वर्षर्तौ वृष्टिर्न जायते।

**कार्तिकस्य द्वितीया वा तृतीया वापि वर्षति।**



**भाविवर्षे बहुजलं न चेत्तस्मिन्नवर्षणम्।।** कादम्बिनी पृष्ठ १७, कारिका ५

चौत्रमासे रेवतीनक्षत्रे सूर्यः विद्यमानः सन् एवं त्रयोदशदिनपर्यन्तं यस्मिन् यस्मिन् स्थाने वायुः प्रचलति, यस्मिन् यस्मिन् स्थले मेघः व्याप्तः स्यात्, विद्युत् विद्योतते, एतानि लक्षणानि मेघस्य गर्भधारणे समुचितानि भवन्ति। वर्षर्तौ विपुला वृष्टिः जायते।

**रेवत्या अर्कभोग्येषु त्रयोदशदिनेष्वपि ।**
**यत्राभ्रं पवनो विद्युत् तत्र गर्भः शुभावहः।।** कादम्बिनी पृष्ठ ४३, कारिका १५३

राष्ट्रीय-संस्कृत-विश्वविद्यालयस्य तिरुपतिनगरस्थस्य ज्योतिषवास्तुविभागस्य आचार्याः डॉ. कृष्णकुमारभार्गवमहोदयाः स्वकीये वक्तव्ये कथितवन्तः यत् अग्रहणमासे पौषमासे माघमासे च तुषारपतनात् सूर्यः चन्द्रमाः यदि मलिनो जायते एवं च ताम्रवर्णकः स्यात् तर्हि आषाढमासस्य शुक्लपक्षस्य सप्तमीतिथितः दिनत्रयं वृष्टिर्भविष्यति।

**तुषारमलिनौ ताम्रौ चन्द्रार्कौ मार्गतस्त्रये ।**
**आषाढशुक्लसप्तम्यारब्धे वृष्टिर्दिनत्रये ।।** कादम्बिनी पृष्ठ २०, कारिका १९

फाल्गुनमासे निरन्तरं आकाशे मेघः व्याप्तः स्यात् एवं च वृष्टिरपि निरन्तरं भवति, इदं लक्षणं मेघस्य गर्भः विजानीयः। मेघगर्भधारणात् वर्षर्तौ विपुला वृष्टिः जायते।

**फाल्गुने नित्यमभ्रं स्यान्न तु पातयते जलम् ।**
**गर्भदोहद-सम्पत्तिं विद्याद् वृष्टिः शुभा भवेत्।।** कादम्बिनी पृष्ठ ३९, कारिका १२५

केन्द्रीय-संस्कृत-विश्वविद्यालयस्य भोपालपरिसरस्य ज्योतिषविभागस्य आचार्याः डॉ. अश्विनीपाण्डेयमहोदयाः स्वकीये वक्तव्ये कथितवन्तः यत् पौषमासे चन्द्रमसम् आधारीकृत्य विचारः कृतः। यदि चन्द्रमाः मूलनामकात् नक्षत्रात् भरणीनामकनक्षत्रपर्यन्तं स्थितो भवति। मूलम्, पूर्वाषाढः, उत्तराषाढः, श्रवणा, धनिष्ठा, शतभिषा, पूर्वभाद्रः, उत्तरभाद्रः, रेवती, अश्विनी भरणी एतानि एकादश नक्षत्राणि सन्ति। सूर्यम् अवलम्ब्य विचारः प्रस्तुतोऽस्ति। सूर्यः आर्द्रा, पुनर्वसुः, पुष्यः, आश्लेषा, मघा, पूर्वफल्गुनी, उत्तरफल्गुनी, हस्तः, चित्रा, स्वाती विशाखा इत्यादिषु एकादशनक्षत्रे स्यात् । तर्हि पौष मासे वर्णितनक्षत्रे मेघस्य गर्भधारणं जायते एव। ज्येष्ठमासे आर्द्रानक्षत्रे विपुला वृष्टिः भवति।

**पौषे मूलाद् भरण्यन्तं चन्द्रचारेण गर्भति।**
**आर्द्रादिभे विशाखान्ते सूर्यचारेण वर्षति।।** कादम्बिनी पृष्ठ २४, कारिका ४१

केन्द्रीय-संस्कृत-विश्वविद्यालयस्य भोपालपरिसरस्य ज्योतिषविभागस्य आचार्याः डॉ. आशीषकुमारचौधरीवर्याः स्वकीये वक्तव्ये प्रतिपादितवन्तः यत् माघमासे मूलनक्षत्रतः भरणीनक्षत्रपर्यन्तं यदि विद्युत् विद्योतते, विद्यत् गर्जति, पूर्वदिशायां वायुः प्रचलति उत्तर दिशायां वायुः प्रचलति तर्हि वर्षर्तौ आर्द्रानक्षत्रतः विशाखानक्षत्रपर्यन्तं सूर्यस्य स्थितौ सति विपुला वृष्टिः सञ्जायते।

पौषारब्धोडुसंदोहे मूलाद्ये भरणीपरे।
विद्युद्गर्जितवाताभ्रैरार्द्रार्कादिषु वृष्टयःध् कादम्बिनी पृष्ठ ३२, कारिका ८८

केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य वेद-पौरोहित्य-कर्मकाण्ड विद्याशाखाविभागस्य सहायकः आचार्यः एवं समन्वयकः, डॉ. प्रकाशरञ्जनमिश्रः, सस्वरं वैदिकमङ्गलाचरणं कृतवन्तः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान्। अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

प्रथमपुटस्य शेषभागः

# शैवपरम्परायां वास्तुशास्त्रस्य....

नेपालसंस्कृतविश्वविद्यालयः काठमाण्डूतः उपस्थितः आसीत्। महोदयेन भगवान् शिवस्य स्वरूपप्रतिपादने उक्तं यत् शिवः पशुपतिः तस्य नैके रूपाः सन्ति । शिवतत्त्वस्य शास्त्रेषु विस्तृतरूपेण चर्चा कृताः वर्तते। नित्यः, शुद्धः, कल्याणकारी, आशुतोषः ,शिवः इति शिवस्य महिमा वर्त्तते। महाराजविक्रमादित्यस्य शासनकालस्य चर्चां कुर्वन् सः अवदत् यत् तस्य नवरत्नानि सम्पूर्णे विश्वे प्रसिद्धानि सन्ति, तेन स्थापितं विक्रमसंवत् भारतेन सह नेपालेदेशेपि अङ्गीकृतम् अस्ति। सारस्वतातिथिः विक्रमविश्वविद्यालयस्य पूर्वकुलपतिः प्रो.बालकृष्णशर्म महोदयः उक्तवान् यत् भगवान् शिवः अनिष्टपरिहारको वर्तते । तेन धारितानि चिह्नानि वास्तुजन्य दोषाणां शमनार्थं उपयुक्तानि। समराङ्गणसूत्रधारस्य चर्चायां महोदयेन कथितं यत् विना वास्तुज्ञानेन शुभाशुभ लक्षणानां ज्ञानं न भवितुमर्हति। विश्वविद्यालयस्य माननीयः कुलगुरुः प्रो. विजयकुमारसीजी महोदयः भारतीयसंस्कृतौ शैवागमस्य, मूलभूतसिद्धान्तानां चर्चां कुर्वन् अवदत् यत् शिवः एव जगतः मूलभूतचेतनातत्वरूपः बन्धनस्य मुक्तेः च कारणम् । मन्त्रवास्तु, शैववादः, शिवस्य शाश्वत सत्ता आदि विषये महोदयेन विस्तरेण उद्बोधितम्। विभागसंयोजकेन डॉ.तुलसीदास परोहेण अतिथिपरिचयः, संगोष्ठीसमन्वयकेन डॉ. शुभमशर्मेण भूमिका च प्रस्तुता। कुलसचिवेन प्रो.दिलीपसोनी महोदयेन विक्रमोत्सवस्य भव्यायोजनाय शुभकामनाः प्रदत्ताः। कार्यक्रमस्य संचालनं डॉ. विजयकुमारेण कृतम्। कार्यक्रमे डॉ. शैलेन्द्रकुमारशर्मा, प्रो.वासुदेवशर्मा, डॉ.अवधेशश्रोत्रियः, डॉ.कृष्ण कुमारभार्गवः, प्रो.प्रभाकर पाण्डेयः, डॉ. संकल्पमिश्रः ,नेपाल, म्यांमार, वियतनामादि देशानां विद्वांसः, छात्राः, शोधकर्त्तारः च उपस्थिताः आसन् ।

# भारतीयवैदिकगणितस्य प्रासंगिकतायाः महत्त्वस्य च विषये एकदिवसीया कार्यशाला

हरिद्वारम् , उत्तराखण्डसंस्कृताकादमी तथा उत्तराखण्डविज्ञानशिक्षासंशोधनकेन्द्रस्य संयुक्ताश्रयेण सम्प्रति भारतीयवैदिकगणितस्य प्रासंगिकता महत्त्वं च इति विषये एकदिवसीयकार्यशालायाः उद्घाटनं अतिथिभिः दीपप्रज्वलनेन कृतम्। अकादमीयाः सभागारे वैदिकमङ्गलाचरणेन, सरस्वतीवन्दनेन च वैदिकविद्भिः कार्यशालायाः उद्घाटनं कृतम् । संस्कृतशिक्षासचिवः डॉ. दीपककुमारगैरोला संस्कृतशिक्षाविभागेन क्रियमाणस्य कार्यस्य विवरणं दत्त्वा संस्कृतभाषा भारतीयज्ञानपरम्परायाः स्रोतांसि आधारांश्च इति उक्तवान् संस्कृतशिक्षाविभागः





संस्कृतभाषायाः विकासाय आइआइटी रुड़की इत्यनेन सह सहकार्यं करिष्यति। यस्मात् कारणात् संस्कृतजगति नूतनक्रान्तिः सम्भावना वर्धते। संस्कृतभाषायाः तर्कः, स्पष्टता, संरचना च सङ्गणकविज्ञानस्य, कृत्रिमबुद्धेः, प्राकृतिकभाषायाः च कृते अत्यन्तं उपयुक्ता भवति । यदि अस्यां दिशि अधिकाधिकं संशोधनं क्रियते तर्हि सङ्गणकप्रोग्रामिङ्गे संस्कृतस्य महती भूमिका भवितुम् अर्हति । संस्कृतस्य विकासाय लक्ष्यं कृत्वा कार्यं कर्तव्यम् । शिक्षानिदेशकः डॉ. आनन्दभारद्वाजः अवदत् यत् अद्यत्वे गणितस्य महत्त्वं न केवलं शिक्षायां अनुसन्धाने च वर्तते, अपितु विज्ञानं, प्रौद्योगिकी, अन्तरिक्षविज्ञानं, कृत्रिमबुद्धिः, डाटा विज्ञानं, वित्तीयक्षेत्रे च तस्य महत्त्वं निरन्तरं वर्धमानं वर्तते।

अकादमीयाः सचिवः डॉ. वज्रश्व आर्यः परिचयात्मकं सम्बोधनं कुर्वन् वैदिकगणितस्य उत्पत्तिः वेदः इति उक्तवान् । वैदिकगणितं सरलसूत्रद्वारा जटिलगणितसमीकरणानां समाधानस्य प्रक्रिया अस्ति ।

भारतीयगणितस्य प्रासंगिकतायाः महत्त्वस्य च विषये वदन् वैज्ञानिकः डॉ. ओमप्रकाश नौटियालः अवदत् यत् भारतं गणितस्य क्षेत्रे प्राचीनस्य समृद्धस्य च परम्परायाः कृते विश्वे प्रसिद्धः अस्ति। शून्यस्य आविष्कारः, दशमलवतन्त्रः, बीजगणितः, त्रिकोणमितिः, गणितीयश्रृङ्खलायाः विकासः च भारतीयगणितज्ञानाम् अद्वितीयं योगदानम् अस्ति । वर्तमानयुगे भारतीयगणितस्य प्रासंगिकता महत्त्वं च पूर्वस्मात् अपि अधिकं वर्धितम् अस्ति । आर्यभट, ब्रह्मगुप्त, भास्कराचार्य, श्रीनिवास रामानुजन इत्यादयः भारतीयगणितज्ञाः गणितं नूतनानि ऊर्ध्वतानि नीतवन्तः । दशमलवव्यवस्था शून्यस्य सिद्धान्तः च सम्पूर्णस्य आधुनिकगणितस्य प्रौद्योगिकीविकासस्य च आधारः अस्ति । भारतीय अन्तरिक्षसंशोधनसङ्गठनम् अन्ये च वैज्ञानिकसंस्थाः गणितीयसिद्धान्तानां उपयोगं कुर्वन्ति येन भारतं विश्वस्य अग्रणीं भवति।

भारतीयगणितस्य वैश्विकप्रभावस्य विषये सः अवदत् यत् भारतीयगणितविधयः न केवलं देशे अपितु वैश्विकस्तरस्य अपि स्वीक्रियन्ते। अद्यत्वे विश्वे सर्वत्र संशोधकाः वैज्ञानिकाः च भारतीयगणितज्ञानाम् योगदानेन प्रेरिताः सन्ति ।

कार्यशालायां विशेषातिथिरूपेण डॉ. आशीषरातुरी नसादियासूक्तस्य उदाहरणं दत्त्वा अवदत् यत् अद्यतनं आधुनिकं विज्ञानं कथं नसादियासूक्तं स्वीकुर्वति।

सः अवदत् यत् नसदिया सूक्तं जगतः उत्पत्तिरहस्यं प्रकाशं क्षिपति। तत्र उक्तं यत् जगतः सृष्टेः पूर्वं न अस्तित्वं न अस्तित्वं न आकाशं न मृत्युः अमृतत्वं वा आसीत् । अथैकमेव अदृश्यशक्तिः, या स्वयमेव स्पष्टा आसीत् । कथं जगत् निर्मितं केन च निर्मितम् इति च कथ्यते । देवाः अपि सृष्टेः अनन्तरं जाताः, अतः एतत् रहस्यं अज्ञातम् अस्ति। अस्मिन् विश्वस्य उत्पत्तिविषये वैज्ञानिकचिन्तनं कृतम् अस्ति । अकादम्याः वित्त अधिकारी सतेन्द्र प्रसाद डबरालः सभी अतिथियों को धन्यवाद दिया। कार्यक्रमस्य आयोजनं अकादम्याः कार्यक्रमसंयोजकः तथा शोधपदाधिकारी डॉ. हरिशचन्द्र गुरुराणी इत्यनेन कृता ।

अस्मिन् अवसरे हरिद्वार नगर निगमस्य मेयर किरण जैसलः, डॉ. लक्ष्मी नरसिंहन्, डॉ. सुरेन्द्र विक्रमसिंह, डॉ. आशीष रातुरी, श्री मोहन सह राज्यस्य सर्वैः संस्कृत सहायकनिदेशकैः, आचार्यैः, प्राचार्यैः, संस्कृत-विद्यालय-महाविद्यालय-शिक्षकैः सह, अकादमीयाः किश-प्रवक्ताभिः सह लाल रातुडी, प्रशासनिक अधिकारी लीला रावतः, रामा, दिव्या, कविता, आकांक्षा, मोहितः, विवेकः, पंकजः, ओमप्रकाशः, अश्विनी आदयः उपस्थिताः आसन् ।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

पवित्रस्थले प्रयागराजस्य ४५ दिवसीयस्य महाकुंभस्य समापनम् उत्तरप्रदेशसर्वकारस्य अनुसारं ६५ कोटिभ्यः अधिकाः भक्ताः तस्मिन् भागं गृहीतवन्तः एषः विश्वविक्रमः अस्ति यस्मिन् एतादृशः विशालः जनसमूहः धार्मिक आस्थायाः सह भागं गृहीतवान् न केवलं पौराणिकानि धार्मिकाणि च कारणानि अपितु खगोलीयानि कारणानि अपि सन्ति, पौराणिकविश्वासानुसारम् देवाः राक्षसाः च अमृतं प्राप्तुं समुद्रं मथन्ति स्म। अस्मिन् समये गंगायाः आगमनम् अत्यंतम् अधिकं भवति, अस्य एकं कारणम् एतदपि यत् प्रयागराजे गंगया, यमुनया सह सरस्वत्याश्चापि मेलनं भवति। सनतन धर्मः अद्यापि श्रद्धायाः आध्यात्मिकतायाश्च धर्मस्य जनाः अपि सन्ति अपितु कुम्भस्य समागमस्य, साधुनां, भक्तानाम् अपि माध्यमं भवति इति अपि सुदृढं कृतम् अस्ति।, लघु वा प्रीआग्राजः, यदा एतादृशः विशालः जनसमूहः तत्रत्यानां जनानां कृते अपि अभवत्, येन परिहारः कर्तव्यः स्यात्, सामान्यजनाः अपि अनुशासिताः भवेयुः, सर्वकारेण कृताः व्यवस्थाः अपि अनुसरणीयाः आसन्। तटः तथा महाकुम्बस्य समये दिल्लीनगरे रेलस्थानके, व्यवस्थायाः अभावेन सह एतत् अपि अभवत्। एतादृशं विशालं जनसमूहं नियन्त्रयितुं ये मानकाः स्वीक्रियन्ते, तेषां समीक्षां कृत्वा भविष्ये एतादृशेषु विशालेषु कार्यक्रमेषु जनसमूहस्य नियन्त्रणार्थं दृढपरिहारः करणीयः इति प्रकटितम् यत् भारतीयमानसस्य प्रचलितं वर्तते तत् अधिकं वर्धयिष्यति अध्यात्मस्य एषा विशालघटना भारतं विश्वमञ्चे स्थापितवती इति न संशयः।

भवदीया

सम्पादिका

### ।। वेद वाणी ।।

'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।
उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ।।
यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ।।'

'Just as we winnow barley with a sieve, a wise man speaks pure wisdom with his intellect. The intelligent and affectionate people grasp the friendliness in the same. They know it ensures their wellbeing.

Such a person rooted in friendliness of speech man is honoured as one of stable wisdom and intelligence among the group of the knowledgeable. The one who mechanically studies the texts without understanding their meaning and context, wanders about like barren cow. His speech is unfruitful and devoid of substance.

The speech of a person who abandons the friendship of the wise, beneficient and scholarly "man, is fruitless. Whatever he hears, he hears it wrongly and it would be devoid of meaning. He will never know the path of righteousness,meritorious deeds and well-being.'

The Rig Veda 10.71.2/5/6

'भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ।।
क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।
विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ।।
एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः ।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ।।'

'This resplendent Goddess Usha that shows right path to all and directs all good deeds, rises and becomes manifest in the sky. The most unique and heavenly Usha opens our doors. She lights up the entire world and awakens all living beings. And She illuminates the sources of prosperity for our benefit.

Goddess Usha, the Dawn, arouses a warrior to get ready for war-related preparations, priests for sacred- fire related activities, workers for earning their food, the prominent for winning fame, the mercantile class for acquisition of wealth and various other classes of people for their respective vocations. She lights up the entire world and awakens all.'""This daughter of heaven, Usha, dispelling all darkness, appears in the sky. The young Goddess Usha, in splendorous apparel, commands all the treasures of this world. O! Most auspicious Usha, come and shine upon us today.'

The Rig Veda 1.113.4/6/7

**संकलन : एस.वासुदेव रावः**

# कुक्षिशूलिन्या वात्सल्यम्



- *प्रो.*रमाकान्तपाण्डेयः
निदेशक,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालम् (मध्यप्रदेशः)

रमायाः करुणविलापं श्रुत्वा तस्यां रात्रौ कोऽपि प्रतिवेशी न निद्रामलभत। सायं यावत् तु सर्वं समीचीनमेव आसीत्, रात्रौ का विपत्तिस्तस्यामापतिता? सा किमर्थं मुक्तकण्ठेन मध्यरात्रौ रोदिति ? एवंविधा नैके प्रश्नास्तद्रोदनेन प्रतिवेशे निवसतां जनानां मनसि समुत्पन्नाः। रमा भौतिकशास्त्रे लब्धशोधोपाधिः मुम्बईनगरे कस्मिंश्चिन् महाविद्यालये प्राध्यापिका । विद्वत्समवाये तस्या अध्ययनशीलतायाश्चर्चा श्रूयते। सर्वे प्रतिवेशिनस्तस्या मधुरव्यवहारेण नितरां प्रसीदन्ति। सामान्यपरिवारे जन्म लब्ध्वा सा स्वीयेन श्रमेण धनमर्जयित्वा कैम्ब्रिजविश्वविद्यालयात् भौतिकशास्त्रे शोधोपाधिं समासादयत। तस्याः पिता मुम्बईनगर-निगमकार्यालये लिपिकपदे कार्यं करोति। स दैनन्दिनावश्यकतायाः पूर्त्तियोग्यमेव वेतनं प्राप्नोति। मातुः शिक्षा स्वल्पैव आसीत्। सा गृहकार्यमेव अकरोत् । रमायाः काचित् सखी कस्यचित् श्रेष्ठिनः एकला पुत्री अभवत्। तस्या विवाहोऽपि तादृश एव धनिनां कुले समभूत्। सा बहुवारं रमया मेलितुं तस्या गृहमप्या -गच्छत्। गौरवर्णां स्मितमुखीं निरहङ्कारां सुशीलां च तां दृष्ट्वा कोऽपि तस्यास्तादृशधनवत्त्वं ज्ञातुं न शक्नोति स्म। तस्या व्यवहारेण जनाः 'फलागमैः तरुष्वपि नम्रता आयाति, इयं तु मानवी' इति वदन्ति स्म। 'मनीषा' इति तस्या नाम, इति रमाया मुखात् सर्वे ज्ञातवन्तः। सायं महाविद्यालयात् यदा गृहं समागता रमा तदा सर्वैः प्रसन्नमुखी साक्षात्कृता। 'किमर्थमिदानीमुच्चैः रोदिति रात्रौ?' इति जिज्ञासया द्वित्रा जनाः तद्गृहं गतवन्तः। कृतेऽपि घण्टिकावादने न सा द्वारमुद्घाटितवती। तया 'घण्टिकास्त्रवः न श्रुयते' इति विचार्य केचन उच्चैराकारितवन्तस्तथापि सा द्वारं नोद्घाटितवती । किं जातं स्यात्, किमर्थं सा रोदिति, का तस्याः समस्या ? इति परस्परं विचारयन्तो जनाः तस्या द्वारि बहुकालं यावत् स्थिताः । मध्ये तस्याः पत्युः स्वरः अश्रूयत। स रमां बोधयति स्म - रमे! समाश्वसिहि, समाश्वसिहि। रोदनेन किमपि कार्यं न सिद्ध्यति। अहं प्रातरेव गत्वा पङ्कजं मनीषाया गृहात् स्वगृहमानेष्यामि। त्वया चिन्ता न कार्या। अलं रोदनेन ।

रमायाः पत्युः स्वरं श्रुत्वा जनानां विश्वासोऽभूत् यद् रमायाः पतिः गृहे वर्तते। स तां बोधयति । कोऽपि रुग्णः चिकित्सालये वर्तते, तदर्थमेव रमा रोदिति।'कोऽयं पङ्कजः? मनीषाया गृहे किमर्थं निवसति? का तस्य समस्या' इति सर्वं प्रातःकाले प्रक्ष्याम इति विचार्य आश्वस्ताः सर्वे स्व-स्वगृहं गतवन्तः। तदनन्तरं रमाया अपि विलापः नैव अश्रूयत ।

मनीषा श्रेष्ठिनो धनदत्तस्य एकैव सन्ततिरभूत्।'सौन्दर्येण सा लक्ष्मीमपि तिरस्करोति स्म। तनुगात्र्यास्तस्याः क्षीणक्षीणः कटिप्रदेशः, अनतिविस्तृते कुचमण्डले लम्बमानाः केशाः क्षामक्षामौ कपोलौ हरिणशावकस्याऽक्षिशोभां च तिरोदधती नेत्रे' सा धातुराद्या सृष्टिरिव अशोभत। अध्ययने कक्षायां सर्वतः श्रेष्ठेति तस्या अध्यापकास्तत्प्रतिभया विस्मिताः प्रायशोऽवदन् - त्वं स्वीयं नाम अन्वर्थतां नयसि मनीषे! मनीषा रमायाः सहाध्यायिनी अभवत्। रमाऽपि अध्ययनेन स्वरूपेण च मनीषाया न्यूना न आसीत। केवलं लक्ष्म्या एव कृपा तस्यां तादृशी नाभवत्। मनीषायाः सौन्दर्यमध्ययनप्रवृत्तिं च वीक्ष्य श्रेष्ठी रामदासः धनदत्तं तत्पुत्र्या हस्तं स्वपुत्राय घनश्यामाय अयाचत। घनश्यामः लन्दननगरे वाणिज्यशिक्षां समधिगम्य सम्प्रति व्यापारे पितुः साहाय्यं करोति स्म। रामदासस्य वाणिज्यं समग्रे राष्ट्रे प्रसृतमभूत्। स भुवि अपरकुबेर इव प्रतिष्ठित आसीत्। धनदत्तः पुत्र्याः कृते सर्वथोपयुक्तं सम्बन्धं विचार्य रामदासस्य प्रस्तावमन्वमनुत।

मनीषाया विवाहः शुभे लग्ने निर्धारितः। तस्या गृहे विवाहोत्सव उपवने वसन्त इव प्रसृतो जातः। मनीषा विवाहोपयुक्तसामग्रीणां सङ्कलने रमां सहायां कृतवती। घनश्यामोऽपि सम्बन्धेनाऽनेन महतीं सन्तुष्टिमगमत्। स्वभावेन सौन्दर्येण शिक्षया च यथा मनीषा तथैव घनश्यामः। अयं विवाहः धात्रा बहु विचार्य कल्पित इति प्रतीयते स्म। विवाहानन्तरं मनीषा श्वशुरालयं गत्वाऽपि रमां नैव व्यस्मरत्। तयोः मैत्री तथैव अक्षताऽतिष्ठत्। मनीषा यदाऽपि रमाया गृहं प्रति आगच्छति स्म तस्याः कृते महार्घं किमपि उपायनं गृहीत्वैव आगच्छति स्म। रमा बहुवारमवोचत् - एतस्य सर्वस्य का आवश्यकता? मम तु तव मैत्रीभावेनैव प्रयोजनम्। रमां प्रत्युत्तरयन्ती मनीषाऽप्यवदत् - अहं किमपि नीत्वा न आगच्छामि। तव प्रियः भगिनीपतिः सर्वमेतद् व्यवस्थापयति । तं कथं नोपालभसे? कदाचिद् रमाऽपि स्वमात्रा सह मनीषां मेलितुं तद्गृहमगच्छत्। एवं पारस्परिकः अनयोः व्यवहारः सम्यक् प्राचलत्। मनीषा रमाया भगिनीत्यपि तयोः सखीभावं दृष्ट्वा केषाञ्चित् विश्वासः अजायत।

एकस्मिन् दिने मनीषा रमां दूरभाषं कृत्वा एकाकिनीं तां स्वगृहमाहूतवती। मनीषायाः स्वरे करुणा आह्वाने दैन्यं वचनेषु च कैङ्कर्यमासीत्। सा रमां विलम्बं विना तत्रागन्तुं प्रार्थितवती। आशैशवाद् रमा मनीषायाः कण्ठे नैतादृशं दैन्यमनुभूतवती। अयमासीत् प्रथमः अवसरः, यदा मनीषाया एतादृशमामन्त्रणं रमया लब्धम्। तस्मिन् समये रमा महाविद्यालये कक्षायामासीत्। सा कक्षां समाप्य तत एव मनीषाया गृहं प्रति प्रस्थिता । तत्र मनीषामश्रुमुखीमवलोक्य रमा चकितचकिता अस्थात्। अनर्थसम्भावनया तस्या हृदयमकम्पत । मनीषाया गृहं प्राप्य तां स्तब्धां रुदतीं चावलोक्य विस्मिता रमा तामपृच्छत् - अपि सर्वं कुशलं मनीषे? गृहे सर्वे स्वस्थास्तु सन्ति? कोऽयं ते रोदनावसरः? कश्चन दुर्वृत्तान्तो लब्धो वा? वद मनीषे, वद। अहं त्वामेतादृशीं द्रष्टुं न शक्नोमि। रमायाः प्रश्नान् अशृण्वतीव मनीषा किमपि नावदत्। सा तां परिष्वज्य उच्चैः अरुदत् । मनीषां तथा विलोक्य रमाया अपि नेत्राभ्याम् अश्रुणि प्रावहन्। सा पुनरपृच्छत् - किं जातं मनीषे? किमर्थं विलपसि? घनश्यामेन कलहः समपद्यत वा? तथा जातं चेत् चिन्ता माऽस्तु, दाम्पत्यजीवने एतत्सर्वं प्रत्यहं भवति । तद्विषये त्वया बहुविचारः न कार्यः। घनश्यामस्तु त्वयि अतितरां स्निह्यति। स अत्यन्तं मृदु-स्वभावः। तेन सह कलहायितं चेद् आगते तस्मिन् सर्वं पुनः सामान्यं भविष्यति। अश्रुप्रवाहेण अलं सखि। स्वप्राणान् दत्त्वापि अहं ते प्रियं करिष्यामि। वद किं जातम्? मनीषाया अश्रूणि परिमृजन्ती रमा तस्या उच्छूननयने शीतलजलेन प्राक्षालयत्, तां जलमपाययत्, आसन्द्यामुपावेश्य पुनः पुनः लालयन्ती च तामपृच्छत् - मनीषे! आशैशवाद् आवयोः सखित्वं वर्तते। आवाभ्यां सर्वं वृत्तं परस्परं चर्चितम्। उभयोः आवयोः जीवनस्य कश्चन अपि पक्षः परस्परं गोपनीयः नास्ति। अद्य कोऽयं व्यतिकरः समागतः यो हि मम श्रवणयोग्यः नास्ति ।'प्रियजननिवेदितं दुःखं सह्यवेदनं भवति' इति जानात्येव भवती। तर्हि किमर्थं ते मनोगतं न निवेदयसि? मनीषा रमाया वाक्यानि श्रुत्वा पुना रोदितुमारब्धवती । सा स्तम्भितकण्ठेन अवदत्-रमे! दुःखस्य औषधं भवति किन्तु कर्मपरिपाकस्य औषधं तु भोग एव। सम्बन्धी भवतु मित्रं वा, कर्मफलस्य भोगे कोऽपि सहाय्यं न कर्तुं शक्नोति, तावत्पर्यन्तं मित्रस्य सम्बन्धिनो वा गतिरेव न भवति। त्वयि मम विद्यते महान् विश्वासः, घनश्यामोऽपि त्वां बहु सम्मानयति। मम जीवने पित्रोरनन्तरं वर्तते तवैव स्थानम्, किन्तु मम दुर्भाग्यं यन्मया सह घटयति, तत्र त्वमपि किमपि कर्तुं न शक्ष्यसि। मम जीवनं शून्यं जातं रमे ! सम्प्रति संसारे किमपि नास्ति मम कृते। एते प्रासादाः इमानि यानानि सुखं सौविध्यं धनं चेत्यादिकं यत् सर्वं त्वं पश्यसि, तदिदानीं मत्कृते लोष्टतुल्यं जातम्। नास्ति एतेषां किमपि प्रयोजनम्। मम दाम्पत्यजीवनमपि नितरां निष्फलमेव स्थास्यति।

किं वदसि मनीषे! अहं किमपि बोद्धुं न पारयामि। स्पष्टं वद। तव 'दाम्पत्यं निष्फलं स्थास्यति' इत्यस्य कोऽर्थः? अपि त्वां घनश्यामः अतर्जयत्? तद्विषये एतावती ते चिन्ता? कुत्र वर्तते सः? अहं तेन सह वार्तां करिष्यामि, सर्वं यथापूर्वं भविष्यति। न त्वया उद्विग्नया भाव्यम्। घनश्यामस्तु प्राणेभ्योऽपि अधिकं त्वयि प्रीणाति। त्वां म्लानमुखीं स न कदाप्यवलोकयितुं प्रभवेत्। इदानीं प्रसन्ना भव । उपविश्य वार्तां कुर्वः। निवेदय माम्, यत् किमपि जातम्। अहं ते साहाय्यं करिष्यामि।

प्रचलन्त्यां रमा-मनीषयोर्वार्तायां मध्ये तत्र घनश्यामोऽपि सम्प्राप्तः। तदागमनेन रमा किञ्चिद् आश्वस्तेव जाता। सा घनश्यामं पृष्टवती - अपि जानाति भवान्, अहं घण्टाद्वयाद् अत्र वर्ते। बहुवारं पृष्टाऽपि नेयं रोदनकारणं वदति, केवलं प्रहेलिका एव बोधयति। भवता सह कलहः सञ्जातो वा? केनचिद् अन्येन कारणेन वा इयं दुःखमनुभवति? अपि भवान् वक्तुं शक्नोति तत्सर्वम्? क्षणं मौनं स्थित्वा घनश्यामः अवदत् - अहमस्या दुःखस्य कारणं जानामि, भवत्यै निवेदयितुमपि शक्नोमि। तन्न केवलमस्या दुःखम्, अस्माकमुपरि दैवेन महत् सङ्कटं पातितम् । आवयोस्तु जीवनं खपुष्पायमाणं जायते। नास्ति भवतीं विहाय संसारे कोऽपि जनः यः अस्मत्साहाय्यं कुर्यात्। केवलं भवत्याः साहाय्येन तद्दूरीभवितुमर्हति। रमा आश्चर्येण घनश्यामं पश्यन्ती अवदत् - मम साहाय्येन दूरीभवितुमर्हति? यद्येवं, तर्हि तद्दुःखमेव नास्ति। अहं तु पूर्वमेव उक्तवती - स्वप्राणान् दत्त्वाऽपि भवतोः प्रियमाचरिष्यामि। यन्मम हस्ते विद्यते, तद्भवतोः हस्ते अस्तीत्येव अवगन्तव्यम्। अहं युवाभ्यां पृथङ्नात्मानं मन्ये। अस्मिन् संसारे तत् किमपि नास्ति यदहं भवतोः कृते दातुं न शक्नोमि। घनश्यामः पुनरवोचत् - 'प्राणानां दानं सुकरं भवति रमे, कदाचित् मित्रस्य प्रियं कर्तुं जीवनं कठिनं भवति'। केचन एव भवन्ति तादृशाः जनाः संसारे ये स्वकीयं सर्वस्वम् अन्यस्य प्रियं कर्तुमुपहरन्ति। अहं जानामि -'भवती मनीषाया अभिन्नहृदया सखी' किन्तु तस्या या समस्या अस्ति, सा नास्ति सामान्या। स्वजीवनं दत्त्वा न भवती तस्याः साहाय्यं कर्तुं शक्नोति, तत्कृते प्राणेभ्योऽपि मूल्यवान् त्यागः करणीयो भविष्यति । प्राणेभ्योऽपि प्रियतरं वस्तु वा स्वहृदयं द्विधा विभज्य वा देयं स्यात्।

'एतौ द्वावपि किं वदतः? यावद् गूढं मनीषा वदति स्म ततोऽपि गूढतरं वदति घनश्यामः। अहं बहु विचार्यापि किमपि बोद्धुं न पारयामि' इति विचिन्त्य रमा घनश्याममपृच्छत् - स्पष्टं कथं न वदति भवान्? मयि अविश्वासकारणाद्वा? 'नहि ,नहि, अत्र अविश्वासस्य कारणं नास्ति किन्तु आवां भवतीं तादृशे सङ्कोचोदधौ पातयितुं नेच्छावः । भवत्याः साहाय्येन घनान्धकाराच्छन्ने अस्माकं जीवने प्रकाशः अवश्यम्भावी इति सलज्जमवोचत् घनश्यामः। वदतु भवान् -' अहं सर्वं कर्तुं सिद्धाऽस्मि। भवत्साहाय्यार्थमहं स्वीयं हृदयमपि खण्डद्वयं विधाय दास्यामि, नास्त्यत्र सन्देहलेशः'। रमाया दार्ढ्यं दृष्ट्वा मनीषा अभ्यधात् - रमे ! यदहं वदामि तदतीव धैर्येण श्रोतव्यम्। आवयोः विवाहस्य त्रीणि वर्षाणि अतीतानि किन्तु सन्ततिमुखदर्शनेच्छा आवयोः पूर्णतां न गता। आवाभ्यां बहुविधाः प्रयासा अक्रियन्त, चिकित्सकानां परामर्शानुसारेण औषधसेवनं कृतम्, बहवः सिद्धाः महात्मानोऽपि पूजिताः, बहुषु मन्दिरेषु अर्चना विहिता, काऽस्ति सा पूजा या नावाभ्यामाचरिता , किमस्ति तद्व्रतं यदावाभ्यां नाऽनुष्ठितम् , पादत्राणं विहाय पद्भ्यां चलद्भ्यामावाभ्यां भगवत्या वैष्णव्याः चरणौ चुम्बितौ, कृता

प्रार्थना,सम्पादिताः सन्ततिप्रदा यागाः, पठितानि स्तोत्राणि सन्ततिलाभाय किन्तु पूर्वजन्मनः कर्मवशाद्वा अस्मिन् जन्मनि कृतपापाद्वा किमपि फलं न लब्धम्। ह्यः पुनः यदा चिकित्सालयं गत्वा स्वीयं परीक्षणं कारितवती तदा चिकित्सकेनोक्तम् - 'अस्मिन् जन्मनि भवती मातृपदं प्राप्तुमेव न शक्नोति' । अन्यस्या कस्याश्चित् कुक्षौ भवतोः सन्ततिः जनिं प्राप्तुं शक्नोति।

रमे ! त्वं जानास्येव- 'वन्ध्याया जीवनं कियद् दुष्करं भवति'। समाजे सन्ततिहीनस्य मुखदर्शनमपि पापाय कल्पते। मातृत्वमप्राप्य स्त्रियाः स्त्रीत्वं न सिद्ध्यति । भवन्ति ताः सौभाग्यवत्यः, याः सन्ततिं जनयन्ति, यासां गृहप्राङ्गणे क्रीडन् शिशुः स्वबालविलासैः जननी- जनकौ मोदयति, पितामहादीन् अव्यक्तवाचा च हर्षयति। अहं दुर्भाग्यग्रस्ता तद् विचारयितुमपि न शक्नोमि। इदानीं त्वमेव आवयोः शरणम्। स्वकुक्षिदानेन अस्माकं कुलं प्रकाशयितुं शक्नोषि रमे! मां दुर्लभं मातृपदगरिमाणं प्रदाय मां लोकनिन्दाया रक्षितुं शक्नोषि, अस्माकं लुप्तपिण्डोदकक्रियान् पितरः सपिण्डान् कर्तुमर्हसि, अस्मदपरिमेयसम्पत्तेः संरक्षणं सम्पादयितुं शक्नोषि । इयमेव आवयोः अभ्यर्थना इयमेव आवयोः याचना इयमेव च आवयोः वरप्रार्थना त्वत्सविधे।

रमा मनीषाया वचनानि चित्रलिखितेव आकर्णयति स्म । 'मैत्री तस्या एवंविधं बलिदानं स्वीकरिष्यति' इति सा न कदाप्यचिन्तयत्। शिरोदाने प्राणानां दाने अङ्गानां दाने खण्डशःविभज्य शरीरस्य च दाने न किमपि विचारणीयं भवति किन्तु कुक्षिदानं न तावत् सरलं सहजं वा । अन्यस्य भ्रूणं स्वकुक्षौ संधार्य तज्जननं कस्याश्चिदपि स्त्रियःकृते महत्कष्टकरम्। अहं तु अविवाहिता, लोके गर्भभारमन्थरां दृष्ट्वा लोका मां किं वदिष्यन्ति ? मनीषया साधु न अभिहितम्, सा स्वार्थान्धा जाता। मां कुक्षिशूलिनीं विधातुं तत्परेयं लज्जामपि नानुभवति। एवं विचारमग्नाया रमाया मुखात् सहसा निर्गतः - मनीषे! त्वया विचार्य नोक्तम्। अनेन दानेन मम जीवनं कलङ्कपङ्के निमग्नं भविष्यति । किमुत्तरं दास्यामि स्वपितृभ्याम् ? मम दाम्पत्यं तु प्रारम्भात् पूर्वमेव नङ्क्ष्यति ? इत्युदीर्य रमा रोदितुं प्रारब्धवती ।

मनीषा तस्याः शिर उपाघ्राय अवदत् - रमे ! अहं स्वार्थान्धा नास्मि। त्वां कलङ्काद् रक्षन्ती तव कुक्षौ स्वीयां सन्ततिं संस्थापयिष्यामि। यदि ते मयि विश्वासोऽस्ति कुक्षिदानार्थं च तत्पराऽसि तर्हि आमूलचूलं त्वामेतन्निमित्तं कल्पितं श्रावयामि । रमा मनीषाया वचनं श्रोतुं सिद्धाऽभवत् । मनीषा अब्रवीत् - रमे ! घनश्यामः लन्दननगरे अध्ययनं कृतवान्। त्वं चापि तत एव शोधोपाधिं सम्पादयितुं वाञ्छसि । घनश्यामस्य बालसखा सञ्जयकेलकरः समाप्तविद्यः लन्दननगरात् समागत्य मुम्बय्यामेकस्मिन् महाविद्यालये प्राध्यापकोऽस्ति। स त्वां मया सह बहुवारं दृष्टवानपि । तव सौन्दर्येण शिक्षया च लुब्धः स त्वां परिणेतुमीहते। यदि त्वमिच्छसि तेन तव परिणयं कारयिष्यामि। अनन्तरं तस्याऽनुमत्यैव एतत् कार्यं सम्पादयिस्यामि। विवाहं कृत्वा शोधोपाधिसम्पादनाय त्वं स्वपत्या सह लन्दननगरं गमिष्यसि, सोऽपि शोधोत्तराध्ययनाय तत्र जिगमिषति । अहं घनश्यामश्चापि सहैव भवावः। तव शोधोपाधयेऽपेक्षितः सर्वोऽपि व्ययः घनश्यामेन दास्यते। लन्दननगरे ते निवासव्यवस्थाऽपि तेनैव कल्पिष्यते।

'कुक्षिदानं नेदानीम् , कालान्तरे करणीयम्' इति विज्ञाय रमा शान्तिमलभत। कालान्तरे किं भविष्यतीति भगवानेव जानाति। मनीषा आत्मनो भावान् रमायै निवेद्य मनसि भारराहित्यमन्वभवत्। घनश्यामेन सह मनीषा रमां तस्या गृहं प्रापयितुं प्राचलत् । प्रसन्नमनसा त्रयोऽपि मुम्बईविश्वविद्यालयसमीपे सञ्जयेनापि अमिलन्। सञ्जयस्य आग्रहं स्वीकृत्य सर्वे कफघ्नीं (काफीं) पीतवन्तः। तस्मिन्नेव प्रसङ्गे उपहासं कुर्वती मनीषा अब्रूत - 'सञ्जय ! स्वहृदयसाम्राज्ञीं रमां किमपि न पृच्छसि। त्वं त्वेनां दत्तहृदयः सन्नपि तथा व्यवहरसि यथा कश्चन सम्बन्ध एव नास्ति । आगच्छ, अस्याः समीपे उपविश्य वर्तालापं कुरु'। सञ्जयः हसन् रमायाः सम्मुखे उपाविशत्। उभौ बहुकालं यावद् वार्तालापं कृतवन्तौ। मनीषा पुनः हसन्ती अवोचत् - सञ्जय! यदि नास्ति अन्यत्कार्यातिपातः, रमां गृहं यावत् प्रापय्य आगन्तव्यम्। आवां गन्तुं शक्नुवः रमे ? आम् , कथं न , अहमेकाकिनी गृहं गन्तुं शक्नोमीत्यवदत् रमा । मनीषा - घनश्यामयोः गमनानन्तरं रमा - सञ्जयौ वार्तालापे निमग्नौ आस्ताम् । तयोः गाढपरिचयोऽनेन मेलनेन समभवत् । अनन्तरं सञ्जयः रमां तद्गृहं प्रापयत् ।

रमा-सञ्जययोः विवाहानन्तरं तौ लन्दननगरं गतवन्तौ। रमया तत्र शोधोपाधये प्रवेशः लब्धः । मध्ये घनश्यामेन सह मनीषाऽपि तत्र प्राप्तवती । तयोः आगमनप्रयोजनं रमा अजानात्। सञ्जयोऽपि वृत्तमेतत् जानाति स्म। विवाहात् पूर्वं घनश्यामेन वार्तालापप्रसङ्गे सञ्जयाय अयं वृत्तान्तः विस्तरेण निवेदित आसीत्। रमयाऽपि कस्मिंश्चित् सन्दर्भे स सूचित आसीत्। मनीषाया आगमनं श्रुत्वा रमा सञ्जयं 'कुक्षि-दानाय त्वया अनुमतिर्न देया' इति प्रार्थितवती । अहं कुक्षिदानं न कर्तुमिच्छामि सञ्जय। अस्मिन् विषये त्वया रक्षणीयाऽहम्। कस्यचिदन्यस्य गर्भं नाहं धारयितुमिच्छामि। सञ्जयः उदारः आधुनिकश्च युवा आसीत् । स रमां प्रत्यबोधयत् - रमे ! त्वया न तथा विचारणीयम् । समाजे जनाः अन्योऽन्यस्य साहाय्यार्थमेव निवसन्ति, अन्यथा तु वने निवास एव श्रेयस्करः। आवयोः सहयोगेन यदि मनीषा - घनश्यामयोर्जीवने प्रसन्नता आयाति, मनीषायाः क्रोडं पूर्णतां भजति, तयोः गृहाङ्गणे शिशोर्विलसितानि विलोक्यन्ते, तर्हि का हानिः। अस्माकं भारतदेशः समेषां कल्याणं कामयते - सर्वे भवन्तु सुखिनः। तत्सुखसुखित्वमेव आनन्दस्य लक्षणं वदन्ति अस्मदाचार्या रमे, न स्वसुखसुखित्वम्। स्वसुखाय केवलं पशवः जीवन्ति। आहारनिद्राभयादिकं मानवेष्वपि पशुवद् वर्तते, परेषां कल्याणभावनैव मनुष्यं पशुभ्यः विशिनष्टि। त्वयाऽवश्यं मनीषाया मनोरथाः पूरणीयाः, तस्यै हर्षस्य अवसरो देयः। मनीषा-घनश्यामयोः सुखेन आवामपि सुखिनौ भवेव। एतदेव तत्सुखसुखित्वं प्रिये। सञ्जय ! 'अनेन कर्मणा परपुरुषवीर्यधारण -पांशुलाऽहं भवेयम्' इति रमावचने हसन्नवोचत् सञ्जयः । किं किं ते मनसि आयाति रमे ! घनश्यामेन ते साक्षात् संसर्गो न भवति, चिकित्सकाः मनीषा- घनश्यामयोः रुधिरनिर्मितं सूक्ष्मपिण्डं वैज्ञानिकरीत्या तव गर्भे स्थापयिष्यन्ति। पांशुलत्वं तु साक्षात् संसर्गेण वदन्ति मनीषिणः। किं न श्रुतं त्वया - 'पाण्डवानां जननी देवी कुन्ती कौमार्ये त्रिलोकप्रकाशकस्य भगवतो भास्करस्य तेजो दधार किन्तु तस्य कौमार्यम् अक्षतम् अतिष्ठत्। कुक्षिदानस्येयं प्रथा न अधुनातनी - 'देवकी-वसुदेवयोः भ्रूणमादाय देवा रोहिण्याः कुक्षौ स्थापितवन्तः' इति कथेयं पुराणेषु प्रसिद्धा । त्वया मनीषायाः सहाय्यं सम्पादनीयमेव रमे ! प्रसन्नचेतसा सम्पादनीयम्। अत्र अहं कमपि दोषं न पश्यामि।

चिकित्सकाः परीक्षणं विधाय रमायाः कुक्षौ मनीषा - घनश्यामयोः भ्रूणं स्थापितवन्तौ। लन्दननगरे निवसन्ती मनीषा रमायाः सौकर्यमकल्पयत्। तां नीत्वा सा चिकित्सकीयपरीक्षणार्थं चिकित्सालयमग -च्छत्। सा कस्मिन् वस्तुनि स्पृहावतीति मनीषा सविशेषमपश्यत्। गर्भभारालसां तां भोजनादिव्यवस्थां कल्पयन्ती मनीषा मोदमन्वभवत। सा तस्यामात्मनः सन्ततिं पश्यति स्म। रमा दिनानुदिनं गर्भभारेण कृशा जायते। क्रमेण सोऽपि दिवसः समागतः यस्मिन् रमा सुन्दरं पुत्रं जनयामास। तं शिशुं दृष्ट्वा मनीषा ङ्क ऽतितरां प्रसन्नाऽभूत्। रमया तस्यै तत्सुखं दत्तवती यद् भगवानपि दातुमसमर्थ आसीत्। तस्या ललाटे विधिना लिखितं वन्ध्यात्वं रमा अपाकृतवती । अहं तुभ्यमाजीवनम् आधमर्ण्यं वक्ष्यामि रमे। त्वं मम कृते देवी असि। यद्यपि रमा जानाति यद् अस्मिन् शिशौ तस्या अधिकारः नास्ति तथापि अस्य जन्मदात्री तु सा एव । तस्य रोदनं श्रुत्वा स्तन्यं तु रमायामेव अवतरति न मनीषायाम्। स रमाया एव क्रोडे शान्तिं प्राप्नोति। कृतेऽपि प्रयत्ने मनीषा सद्योजातस्य तस्य मनोभावान् ज्ञातुं न पारयति , किन्तु रमा कदा स दुग्धं वाञ्छति कदा च निद्रातीति सर्वमवगच्छति। मनीषा षण्मासात्मकमेनं गृहीत्वा गमिष्यति तावदत्रैव स्थास्यतीति विचारोऽपि रमां बहुधा अपीडयत् , किन्तु एतत्सर्वं सा कुत्र कथयेत् ?

स शिशुः षण्मासात्मकः जातः। रमया सह हसति क्रीडति तस्याः स्तन्यं च पिबति । यद्यपि रमा तं गृहे परित्यज्य प्रातः शोधकार्यार्थं विश्वविद्यालयं गच्छति, तस्या अनुपस्थितौ मनीषा एव तं रक्षति, किन्तु गृहमागतायां रमायां न स मनीषायाः क्रोडे रमते। रमां दृष्ट्वा स्वाभाविकं बालचापल्यं कुर्वन् स तामेव आह्वयन्निव प्रतिभाति । रमा च तां चुम्बति, लालयति स्तन्यं पाययति, तेन स शान्तिमवलम्बते।

मनीषा घनश्यामेन सह शिशुमेनं नीत्वा आगामिनि मासे भारतदेशं गमिष्यतीति विचारमात्रेण रमा खिद्यते स्म। नवमासान् यावत् सा तं गर्भे धारितवती । इयं तं नीत्वा गमिष्यति, कथं पालयिष्यति, बुभुक्षितं तं दुग्धं पाययिष्यति वा न वेति, इयं धनाढ्या, शिशोः पालने धात्रीं वा योजयिष्यतीति नैकविकल्पसागरे उन्मज्जन्ती निमज्जन्ती च रमा व्याकुलाऽभवत्। यदा मनीषा तं नीत्वा लन्दननगरात् भारतदेशं प्रति प्राचलत् , तदा रमा अतीव दुःखमन्वभवत्। तस्या हृदयं द्विधा विभक्तम्। सा मनीषां तद्रक्षणाय प्रार्थितवती। ततः स्वप्रकोष्ठमागत्य तद्द्वारं च पिधाय अरुदत। सञ्जयः तां प्राबोधयत् - रमे ! अयमाजीवनं तव संरक्षणे मुम्बय्यामेव भविष्यति। त्वं यथेच्छं तं स्वगृहमानेतुं शक्ष्यसि। त्वयि शोधकार्ये समापिते सति आवामपि तत्रैव चलावः। प्रत्यहं तव पुत्रेण सह क्रीडावः इत्येवं सञ्जयः रमां बहुधा सान्त्वयामास।

रमा तं शिशुं 'पङ्कज' इत्यवदत्। यथा पङ्के जनिं लब्ध्वा पङ्कजं सर्वत्र स्वसौरभं विस्तारयति, तस्मिन्न भवति पङ्कस्य प्रभावस्तथैव अयं मम पुत्रः सर्वत्र स्वकीर्त्या प्रसिद्धो भवेत्, तस्मिन् तज्जनन्याः प्रभावो न स्यात्। पङ्कजं विना लन्दननगरे रमाया मनो न अरमत। सा शीघ्रं शोधकार्यं समाप्य मुम्बानगरीं गन्तुमैच्छत्। पङ्कजः मनीषाया गृहे निवसतु नाम, तत्र गत्वा अहमपि तं द्रक्ष्यामि। सा रात्रिन्दिवं परिश्रम्य वर्षाभ्यन्तरे स्वशोधकार्यं समापितवती । लन्दननगरात् सञ्जयेन सह प्रस्थाय सा मुम्बईं प्राप्तवती। रमा प्रतिदिनं पङ्कजं द्रष्टुं मनीषाया गृहमगच्छत। मनीषाऽपि तस्या आगमनेन प्रसन्नतामनुभवति स्म।

मनीषाया गृहसमीपवर्तिनि महाविद्यालये रमा प्राध्यापिकात्वेन नियुक्ता। इदानीं तस्या एकेन मार्गेण उभयमपि सिद्ध्यति स्म । वर्षद्वयात्मकोऽभूत् पङ्कजः किन्तु सह चलितुं न आपारयत। बहवःचिकित्सकाः शिशुरोगविशेषज्ञा घनश्यामेन तच्चिकित्सार्थं समाहूताः। ते एतदेव अवदन् - 'अयं किञ्चिद् विलम्बेन चलिष्यति। भवन्ति केचन बालका ये विलम्बेन चलन्ति'। चिकित्सकानां निर्देशानुसारेण पङ्कजं मनीषा तस्य हस्तं गृहीत्वा चालयति स्म । रमाऽपि आगत्य तं चालयति तैलं च तस्य पादयोः लिम्पति। पङ्कजस्य स्थितिरियं रमाया मनसि भयमुदपादयत्। सा बहुभिः शिशुरोगविशेषज्ञैः चिकित्सकैः परामृशत् , तेषां परामर्शानुसारेण च औषधमकल्पयत् तथापि कोऽपि लाभो नान्वभूयत । मनीषाऽपि सततं चिन्ताग्रस्ता एव अतिष्ठत्। पङ्कजः स्वयमुत्थातुमपि न अशक्नोत्। मुम्बईनगरे प्रकाशखण्डवडीकरनामा कश्चन अतिप्रसिद्धः चिकित्सक आसीत्, मनीषा पङ्कजं नीत्वा तत्समीपं गतवती । स च बहुविधानि परीक्षणानि विधाय अवदत् - 'अयं बालः विशिष्टाऽस्थिरोगेण ग्रस्तोऽस्ति । अस्य अस्थीनि सन्ति शक्तिरहितानि । भगवत्कृपयैव अयमुत्थातुं चलितुं च शक्नोति। भवद्भिः प्रयासो विधेयः, कदाचिच्चलितुं शक्नुयात्'। मनीषा खिन्नमनसा तं शिशुं गृहमानीतवती। अपरस्मिन् दिने तत्र प्राप्तां रमां मनीषा चिकित्सकोक्तम् अश्रावयत्। 'दुर्भाग्यं न कदापि त्यजति रमे ! मम भाग्ये सन्ततिसुखं न लिखितं विधात्रा । तव कुक्षौ जातेन बालेनाऽहं मातृपदं प्राप्नुवम् , किन्तु भगवते तदपि न रोचते। अमुं पङ्गुं बालकं गृहीत्वा किं मम सिद्ध्येत्' ? मनीषाया मुखात् पङ्कजस्य कृते पङ्गुशब्दस्य प्रयोगं श्रुत्वा रमा मनसि कष्टमनुभूतवती। क्रुद्धाऽपि सा धैर्येण मनीषां प्राबोधयत - 'मनीषे! एवं न वक्तव्यम्। पङ्कजः अवश्यं चलिष्यति। स भवत्याः पुत्रः । अपशब्दैः स न सम्बोधनीयः'। मनीषा अवदत्- तथा नास्ति मम भावः रमे! अयं पङ्गुश्चेत् मम एतेन शिशुना किं प्रयोजनम् ? बहवः सन्ति अनाथालयाः , तत्रैव एनं त्यक्ष्यामि। अहं तु सुन्दरं सुशीलं गुणोपेतं बालकमिच्छामि, यः अस्माकं साम्राज्यस्य उत्तराधिकारं पश्येत्। रमा इतोऽग्रे श्रोतुं समर्था नासीत्। सा 'शीघ्रं मया गृहं गन्तव्यम्' इत्युक्त्वा ततः प्राचलत्।

मार्गे पङ्कजं चिन्तयन्ती सा व्याकुलाऽभवत् -'मयि जीवति मम पुत्रःअनाथालये भविष्यति ? तस्मिन् यावान् मदीयोऽधिकारः वर्तते न तावान् मनीषायाः। अहं तस्य जननी, मम रक्तेन सः पुष्टोऽभवत्, मम दुग्धमपिबत्, मनीषा तं पङ्गुं वदतु काणं वा वदतु, स तथा नास्ति। स अवश्यं स्वपद्भ्यां चलिष्यति, धाविष्यति, विद्यालयं गमिष्यति। मम द्रढीयान् विश्वासः 'स अवश्यं चलिष्यति'। एवं विचारयन्त्यां कदा गृहमागतमिति न रमा अज्ञास्त। गृहे सञ्जयः तां प्रतीक्षते स्म। सञ्जयं दृष्ट्वा रमाया धैर्यसागरः भग्नो जातः, उत्तालतरङ्गैः उच्छलन्तो भावा अश्ररूपेण पर्यणमन्त। रमा सञ्जयस्य स्कन्धे शिरोनिधाय सचीत्कारमरुदत्। किमिदम् , किमर्थमियं रोदितीति सञ्जयः नैव जानाति स्म। स बहुवारं तामपृच्छत् तदा रमा सर्वं वृत्तजातं तस्मै न्यवेदयत्।

रमा - मनीषा अस्माकं पुत्रमनाथालये दातुं वाञ्छति ।

सञ्जयः - तेन अस्माकं का हानिः ? पङ्कजस्तु मनीषा - घनश्यामयोः पुत्रः, न अस्मदीयः।

रमा - किं वदसि सञ्जय !'पङ्कजः मनीषा - घनश्यामयोः पुत्रः' । नहि, नहि, स न मनीषा - घनश्यामयोः, आवयोः पुत्रः, तव पत्न्यां रमायां जातः पुत्रः। मनीषा - घनश्यामयोः कः अंशः चिकित्सकैः मयि योजितः इति तु नाहं जानामि, किन्तु अहं तं स्वकुक्षौ धारितवती स्वीयं स्तन्यं च पायितवती। मम आत्मा तस्मिन् निवसति स च मम हृदये भवति। मातृत्वस्य कष्टं सुखं चेत्युभयमहमेव अनुभूतवती , न मनीषा । स मम आत्मजः। यस्मिन् दिने शिशुः मातुः गर्भे आयाति तस्माद् दिनात् जनन्याः सत्त्वमेव शिशुरूपेण घटनमारभते। पुत्रे माता विद्यमाना भवति मातरि च स पुत्रः। स मदभिन्नः वर्तते सञ्जय ! अहं तस्मिन् वर्ते स च मयि विद्यते।

सञ्जयः - एतत् सर्वं मिथ्या। पङ्कजः मनीषा - घनश्यामयोः अंशः, तयोरेव पुत्रः। तव पुत्रः कथं भवितुमर्हति सः।

रमा - किं वदसि सञ्जय । त्वमसि लब्धख्यातिः वैज्ञानिकः। किं न जानासि एतस्मिन् विषये वैज्ञानिकम् अभिमतम्। संसारे कोऽपि पुरुषः केवलं पुरुषः नास्ति, स स्त्री अपि भवति। तस्य चैतन्यांशः भवति पुरुषः किन्तु अचैतन्यांशे तस्मिन् क्वचित् स्त्री अपि भवति। तथैव स्त्रियां स्त्रीत्वं पुंस्त्वं चेत्युभयं विलसति। पङ्कजस्य अचैतन्यांशे या स्त्री विलसति, सा न काचिदन्या । सा त्वदीया प्रियतमा, त्वदीया अर्धाङ्गिनी, त्वदीया सहगामिनी, इयं रमा, न मनीषा। अस्माकं पुराणेष्वपि सोऽयं सिद्धान्तः अर्धनारीश्वरनाम्ना महर्षिभिः पुरस्कृतः। त्वया तदानीं तत्सुखसुखित्वभावनयाऽहं प्रेरिता । अत्र प्रयुक्तेन तत्पदेन त्वया तस्मिन् काले मनीषा ग्रहीता, इदानीं तेनैव तत्पदेन पङ्कजः ग्राह्यः। किं तस्य सुखेन आवयोः सुखित्वं न भवितुमर्हति ?

'पङ्कजः आवयोः पुत्रः सञ्जय। स अवाभ्यां रक्षणीयः लालनीयः पालनीयश्च। तं श्वः मनीषाया गृहात् स्वगृहम् आनयावः। तस्य बालचाञ्चल्येन आवयोः गृहं शोभिष्यते। आवयोः प्रेम्णा सः तस्य च प्रेम्णा आवयोःजीवनं पूर्णतां प्राप्स्यति। अत्र आवां तस्य चिकित्सां कारयिष्यावः। स अवश्यं स्वस्थो भविष्यतीति' वदन्ती रमा पुनः सचीत्कारमरुदत्।

प्रातःकाले गत्वा सञ्जयः पङ्कजं मनीषाया गृहात् स्वगृहमानयत्। रमायाः शुश्रूषया च स स्वस्थोऽभूत्।



## होलिका चतुर्दशी



डॉ. श्रेयांशद्विवेदी
संस्थापकःकुलगुरुः

मान्यमान्यः सुधीर्धार्मिको नैष्ठिकः,
श्रद्धया तत्र मन्त्रालये नीतिमान् ।
शिक्षणे नीतिमादाय भव्यं कृतम्,
होलिका पर्वणि प्रीयतां सर्वदा ॥१॥
कांक्षितं भारतीयं शुभं शिक्षणम्,
ज्ञानविज्ञानभूतं मुनीनां तपः।
वेदनिष्ठं समादाय वैज्ञानिकीम्,
होलिका पर्व भूयात् सुविज्ञानदम् ॥२॥
संस्कृतज्ञो भवान् ध्येयनिष्ठस्तथा,
भाषणे दत्तचित्तः प्रवीणस्सदा।
योजनासु प्रकल्पेषु नित्यं भवान्,
होलिका पर्वणि प्राप्नुयान् मानसम् ॥३॥
सन्ततिः सर्वदा वार्षिके पर्वणि,
धार्मिकीं भावनां सर्वदा संस्कृताम् ।
प्राप्य सौख्यं धनं दीर्घमायुस्तथा,
होलिका पर्वणि प्रीयतां सर्वदा ॥४॥
आम्रमन्दारविल्वार्ककाष्ठानि वै,
श्रद्धयापूजनं त्याज्य भद्रां सदा।
उत्तमं वार्षिकं पर्व सोल्लासदम्,
होलिका पर्व सद्यो भवेत् प्रीतिदम् ॥५॥
राष्ट्ररक्षारतानां तथा कर्मिणाम्,
श्रेष्ठिनां सर्वदोद्योगिनां धर्मिणाम्।
कर्षकाणां कृते शिक्षकाणां कृते,
होलिका पर्व सौख्यप्रदं जायताम्॥६॥
भारतं भातु विश्वस्तरे सर्वदा,
भारते सन्तु संस्कारवन्तः समे।
चिन्तनं मानसेऽसौ सदा जायते,
दुर्लभो दीर्घजीवी भवेत् भावकः ॥७॥
त्यागनिष्ठो विवेकी वरिष्ठो महान्,
स्वात्मभावेन ईशं जपन् मानवः ।
सर्वदा कार्यलग्नः विकासात्मके,
होलिका पर्वणि प्रीयतां सर्वदा ॥८॥
योगविद्यापरः सेवको भारते,
शास्त्रसंरक्षणार्थं समाराधकः।
सन्तु सर्वे स्वकीये रतः कर्मणि,
यस्य सच्चिन्तनं दीर्घजीवी भवेत् ॥९॥
अद्य सारस्वतं तं कविं शाश्वतम्,
ज्ञानवन्तं प्रसिद्धं सुविज्ञं मुदा ।
स्वास्थ्यलाभाय दीर्घायुदा सर्वदा,
होलिका पर्व भूयात् शुभं मङ्लम् ॥१०॥
जन्तुजीवास्तडागाः खगाः पक्षिणः,
बालवृद्धौ युवानस्त्रियो मानवाः ।
पर्वताः ब्रह्मपुत्रादि सरितस्तथा,
होलिका पर्वणि प्रीतियुक्ताःसमे ॥११॥
राज्यपालस्तथा मुख्यमन्त्री सुधीः,
मन्त्रिणः शासकाः विश्वविद्यालयाः ।
शिक्षकाः छात्रछात्राः स्वराज्ये सदा,
होलिका पर्वणि प्रीतियुक्ताःसमे ॥१२॥
कुम्भपर्व महद्दिव्यं,
प्रयागे सम्प्रवर्तितम् ।
आचार्याणां प्रभावेण,
सद्यो मोक्षप्रदायकम् ॥१३॥
भारते वृष्टि लाभाय, धान्योत्पत्तिरवाप्तये ।
आधिव्याधिविनाशाय,
होलिका स्यात् सुखावहा ॥१४॥


### पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**


## प्रसिद्धा शक्तिपीठेषु काकटपुरमंगला



प्रो. बनमाली बिश्वालः

प्रसिद्धा शक्तिपीठेषु काकटपुरमंगला।
जगन्नाथस्य संस्कृत्या देवी सम्बद्ध्यते पुनः॥
मंगलाख्यपुरे ग्रामे दिव्या देवी प्रतिष्ठिता।
कालान्तरे सोपि ग्रामश्चान्यनाम्ना प्रसिद्ध्यति॥
प्राचीनद्यां च नौयात्रां कुर्वन्नासीतु नाविकः।
नदीमध्ये क्वचिन्नौका चावरुद्धा हठात् पुनः॥
नाविकः कारणं ज्ञातुं प्रायतत यथामति।
किन्तु स विफलो जातः किं तत्र कारणं भवेत्॥
आदेशश्चाभवद्रात्रौ नाविकस्य कृते महान्।
'मम मूर्तिं नदीगर्भे मज्जितां च समुद्धर'॥
ततो निमज्ज्य नद्यां च भक्तवरस्स नाविकः।
दिव्यां मूर्तिं च निष्कास्य स्थापयामास मन्दिरे॥
मंगलाख्यपुरे ग्रामे प्रतिष्ठिता च मंगला।
काकटपुरनाम्नैव स ग्रामः परिवर्तितः॥
प्राचीनद्यास्स्थले यस्मिन् मूर्तिरासीन्निमज्जिता।
तत्रैवालौकिकं तथ्यं समक्षं वै समागतम्॥
काको नद्याः जले कश्चित् न्यमज्जत कुतः स्वयम्।
किन्तु पुनस्ततः काकः हन्त न पुनरागतः॥
अवरुद्धो यतः काकः काकटपुर उच्यते।
एवं नाम प्रसिद्धं वै काकटपुरमंगला॥
प्रत्यक्षा मंगला देवी लोक-कल्याणकारिणी।
सर्वेषां मंगलं कृत्वा प्रसिद्धा सर्वमंगला॥
नवकलेवरे काले मंगलोस्ति सहायिका।
दारोरन्वेषणे देवी भवति मार्गदर्शिका॥
पर्वाणि च प्रसिद्धानि मंगलायाश्च कानिचित्।
झामुयात्रा प्रसिद्धोस्ति देवस्नानाख्य-पूर्णिमा॥
दुर्गापूजाश्च तास्सर्वाः पाल्यन्ते च यथाविधि।
उत्कलीयः प्रभावश्च सर्वविधिषु दृश्यते॥
विग्रहे च प्रभावोस्ति प्रभावोपि समर्चने।
प्रभावश्च प्रसादेषु दृश्यते चोत्कलस्य वै॥

## जयतु राष्ट्रध्वजः




शिक्षाश्रीः डॉ. मञ्जूषा चन्दे ठेमदेवः
साहित्यविभागः केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला त्रिपुरा


त्रिवर्णयुतोऽयं राष्ट्रध्वजः, विलसति हृदये हृदये
भारतीयानामभिमानोऽयं विधूनोति सदने सदने।
सदैव जयतु त्रिरङ्गः, विश्वे जयतु राष्ट्रध्वजः॥धृ॥

उपरि विराजते काषायः, सेवा-त्याग-बलिदानस्य
बोधयति च शौर्यवीरतां, पुनीतपावनभारतस्य।
सदैव जयतु त्रिरङ्गः, विश्वे जयतु राष्ट्रध्वजः॥१॥

ध्वजे शोभितः हरितवर्णः, विश्वासस्य नु निदर्शकः
हरितमयता भारतभूमेः, सुखसमृद्धेः सदा बोधकः।
सदैव जयतु त्रिरङ्गः, विश्वे जयतु राष्ट्रध्वजः॥२॥

मध्ये विलसति धवलवर्णः, शान्त्यैकतायाः सत्यप्रतीकः
शुद्धनिर्मलभावभावना-अखण्डभारतदिग्दर्शकः।
सदैव जयतु त्रिरङ्गः, विश्वे जयतु राष्ट्रध्वजः ॥३॥

राराजते चक्रमशोकस्य, बन्धनमेकसूत्रसदृशम्
गान्धेरपि संस्मरणं चक्रं, तद्देशगौरवगुणान्वितम्।
सदैव जयतु त्रिरङ्गः, विश्वे जयतु राष्ट्रध्वजः॥४॥

जयति परमपुण्यं भारतं राष्ट्रमेतद्
जयतु स हितनिष्ठो धर्ममार्गस्सदीयः।
जयतु तदुदिताऽसौ संस्कृतिः सत्त्वशीला
जयतु तदनुगामी साधुवृद्धो वरेण्यः॥५॥

# विठूरे संस्कृतभारत्याः कर्णपुरप्रान्तस्य समीक्षागोष्ठी-डॉ. रत्नेशत्रिवेदी

वार्ताहरः - आचार्यदीनदयालशुक्लः

कानपुरम्। समग्रविश्वे संस्कृतस्य प्रचारप्रसाराय समर्पितं सङ्घटनं संस्कृतभारत्याः कर्णपुरप्रान्तस्य कार्यकर्तृभिः प्रान्तसमीक्षागोष्ठ्याः आयोजनं कृतम्। इयं गोष्ठी कर्णपुरस्य विठूरस्थ सुधांशु जी महाराज आश्रमे समायोजिता अभवत्। अद्य संस्कृतभारतीकानपुरप्रान्तस्य समीक्षायोजना आविश्वे १९८१ तमवर्षात् निरन्तरं कार्यं कुर्वदस्ति । प्रदेशे संस्कृतस्य प्रचारप्रसारे संस्कृतभारत्याः महत् योगदानं वर्तते । गोष्ठ्यां संस्कृतभारत्याः तस्याः कार्याणां परिचयः, भविष्यस्य योजना इत्येताभिः सह सांस्कृतिक कार्यक्रमाणाम् आयोजनमपि कृतम्। गोष्ठ्या स्वीकर्तारौ अखिलभारतीयमहामंत्री श्रीमान् सत्यनारायणभट्टवर्यः तथा पूर्वोत्तरप्रदेशस्य




गोष्ठी कर्णपुरस्य विठूरस्थ सुधांसु जी आश्रमे समायोजिताऽभवत्। तत्र निखिलप्रान्तस्य सर्वेऽपि दायित्ववन्तः कार्यकर्तारः समवेत्ता अभवन्। आवर्षे क्रियमाणानां कार्याणां समीक्षा तथा अग्रिमस्य आवर्षस्य पूर्वयोजना विषये कार्यकर्तृभिः वैचारिकमन्थनं कृतम्।सङ्घटनस्य अखिलभारतीय महामन्त्री श्री सत्यनारायणभट्टवर्यः उक्तवान् यत् अस्मिन् सम्मेलने सम्पूर्णप्रान्ततः संस्कृतभारत्याः सर्वे अपि दायित्ववन्तः कार्यकर्तारः तथा सम्भाषणशीलाः जनाश्च सम्मिलिताश्च समागत्य आगामिनि कार्ययोजनाविषये विविधसत्रेषु परिचर्चितवन्तः। पूर्वोत्तरप्रदेश क्षेत्रसंगठनमन्त्रि श्री प्रमोदपण्डितवर्योऽवदत् यत् संस्कृतभारतीसङ्घटन क्षेत्रसंगठनमन्त्रि श्रीप्रमोदपण्डितवर्यः समुपस्थितौ आस्ताम्। नूतनदायित्वस्य निर्वहणाय सहप्रान्तसङ्घटनमन्त्रित्वेन पूर्वतन चित्रकूटविभागसंयोजकः डॉ रत्नेश त्रिवेदीवर्यः तथा जालौनजनपदसंयोजकत्वेन सर्वेशकुमार शाण्डिल्यः, मौदहाविकासखण्ड संयोजकरूपेण मनीषदीक्षितः, औरैया जनपदसंयोजकः नितिनकुमारः, संयोजकत्वेन अखिलेशश्चेते नवीनाः चिताः। अस्मिन् कार्यक्रमे कानपुरप्रान्तस्य प्रान्तमन्त्रिआचार्यचन्द्रप्रकाशत्रिपाठिवर्यः तथा अमोलार्यः प्रो. शोभामिश्रा, सन्ध्या गुप्ता, सर्वेशशाण्डिल्य, जयनारायण शुक्ल, मनीष दीक्षित सहितं प्रान्तस्य नैके दायित्ववन्तः कार्यकर्तारः समुपस्थिताः अभवन्।

# समीक्षाचक्रवर्ति-महामहोपदेशक-पण्डितमधुसूदनओझा-मतेन ब्राह्मीलिपिभ्रान्तिनिवारणम्



**श्रीमती अंजना शर्मा**
विभागाध्यक्ष पांडुलिपि व लिपि विज्ञान विभाग ,
विश्वगुरुदीप आश्रम शोध संस्थान जयपुर राजस्थान

लिपिरपिखल्वार्याणां ब्राह्मी लिपिरेव सर्वतः पूर्वम् ।
उदभवद् ब्राह्मी भाषा चेत्युक्त भारते शान्तौ ।।1।।
'इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती।
विहिता ब्रह्मणा पूर्व लोभात् त्वज्ञानतां गताः ।।
''(महाभा.शान्ति.188115)''
ब्राह्मी भाषा संस्कृतभाषेयं ब्राह्मणैरल्पैः।
विज्ञायते न सर्वैब्राह्मी तु लिपिर्न लिख्यते ह्यधुना ।।2।। वेदमन्त्रनिर्माणकाले लिपिसामान्याभावमतखण्डनाय श्रुतिशब्दव्यपदेशस्य मौलिकरहस्योपपादनम्।
ऋग्वेदश्रुतिनिर्मितिकाले काचिल्लिपिर्नासीत्।
अत एव कण्ठपाठश्रवणाच्छ्रुतयः श्रुता वेदाः ।।3।।
का इत्थं ब्रवते केचित् पाश्चात्यः कल्पनारसिकाः। अनभिज्ञास्तेन्नं भारतवैदिकरहस्यविज्ञाने।।4।।
विबुधैस्त भारतीयैः संकेतित एष यत्रार्थे।
श्रुतिशब्दः प्राक् कालात्तं संकेतं प्रवक्ष्यामि ।।5।।
सत्यानांधर्माणां ज्ञाने हेतुः प्रमाणमित्युक्तः।
प्रत्यक्षं ह्यनुमान शास्त्रं चेति त्रिधा तत्स्यात् ।।6।।
दृष्टिः श्रुतिः स्मृतिर्वा निबन्ध इति हेतवो ज्ञाने।
दृष्टेः प्रत्यक्षत्वंशास्त्रत्वं तु श्रुतिस्मृत्योः ।।7।।
चक्षुषिसत्यं निहितं चक्षुर्गुणात्मदोषमनुपाधि।
एकं तदेव मुख्यं प्रमाणमन्यत्तु तदपेक्षम् ।।8।।
वाक्यानपेक्षवाक्यं श्रुतिरिति मीमांसया सिद्धम्।।
दृष्टिः श्रुतिरेकोऽथों वेदाः प्रत्यक्षमित्याहुः ।।9।।
द्रष्टाक्यं श्रुतिरिति संकेतो दृष्टिमूला सा।
दृष्टा दृष्टं ब्रूते श्रृणुते श्रोता च दृष्टमेवार्थम् ।।10।।
दृष्टिः स्वतःप्रमाणं द्रर्ष्वाक्यं स्वतःप्रमाणं स्यात्।
प्राथमिक तज्ज्ञानं न ज्ञानाज्ज्ञानमवतीर्णम् ।।11।।
श्रोतुर्वाक्यं स्मृतिरिति संकेतो नात्र वक्ताऽयम्।
स्वीयां दृष्टिं ब्रूते परानुभूतं गिराऽभिनयेत् ।।12।।
स्मृतिरिति मतमनुमानं तल्लिङ्गज्ञानतो ज्ञानम्।
नाप्तः स्वयं स वक्ता श्रुतवानाप्तात् स्मृतः सोऽर्थः ।।13।।
परपुरुषीयप्रत्ययने योऽस्य प्रत्ययस्तस्मात् ।
परतःप्रमाणमेतद्वाक्यं वाक्यान्तरापेक्षम् ।।14।।
द्रष्टाक्यं यावन्नोपदृष्टम्भक्त्याऽयमाश्रयते।
न च तावत्स्वं वाक्यं शक्नोत्येष प्रमाणयितुम् ।।15।।
इत्थं शास्त्रं द्विविधं स्वतःप्रमाणं परप्रमाणं च।
नातः परं तृतीय शास्त्रं संभाव्यते किमपि ।।16।।
परतःप्रमाणशास्त्रे यत्र द्वैविध्यमापतति ।
विप्रतिपत्तावन्योऽनुमानमत्र प्रवर्तयति ।।17।।
अनुमानाद् यद्युभयोर्विरुद्धवाचोः स तात्पर्यम्।
पृथगिव नीत्वा सत्यं गृह्णीयात्स हि निबन्धः स्यात् ।।18।।
अपि च निबन्धं शास्त्रं मन्यन्ते तस्य शास्त्रत्वम्।
शास्त्रानुबन्धतः स्यादपचारात् सोऽस्ति तर्कस्तु ।।19।।
सर्वमपीदं वाङ्मयमित्थं त्रेधा प्रमाणं स्यात्।
यत परेभ्यो भिन्नं तदप्रमाणं प्रलापः सः ।।20।।
न तु केवलमिदमित्थं भारत एव प्रमाणमुपपाद्यम्।
देशेषु किन्त्वशेषेष्वशेषभाषास्विदं तुल्यम् ।।21।।
किन्त्विह भारतवर्षे तदिदं मीमांसितं तस्मात्।
संकेताय नियुक्ताः श्रुतिस्मृतिप्रभृतयः शब्दाः ।।22।।
इति पूर्वेषां विदषां संकेतं ये न जानन्ति।
भ्रान्तं श्रुतिशब्दार्थ प्रकल्प्य ते भ्रामयन्त्यन्यान् ।।23।।
इह भारतीयविद्यारहस्यशिक्षामनासाद्य।
भारतशास्त्रपदानां विक्षेपणमित्थमन्याय्यम् ।।24।।
न ह्येष श्रुतिशब्दो मन्त्रार्थः मन्त्रसंहितासूक्तः ।
लिपिकाले त्वविशेषान्मन्त्रे च ब्राह्मणे चोक्तः ।।25।।
श्रवणाच्छ्रुतिरभविष्यच्छ्रुतिशब्दस्तदवश्यमभविष्यत्। ऋग्वेदेऽप्युल्लिखितः किंतु न लिपिशब्दवत्स तत्रास्ति ।।26।।
श्रवणाद्यदि श्रुतिः स्याच्छ्रुतिशब्दस्तहिन प्रयुक्तः स्यात्। लिपिकालोत्पन्नेषु ग्रन्थेषु ब्राह्मणाख्येषु ।।27।।
मंत्रनिर्माणकाले लिपिसत्त्वे वैदिकं प्रथमं प्रमाणम्
अपि च ब्रूवते केचिद् लिपिरभविष्यत्तु वेदससयेचेद्। लिपिलेखनीमसीनामप्यभविष्यत् क्वचनोल्लेखः ।।28।।
तत्र ब्रूमो लिप्युल्लेखार्थो न प्रसङ्ग आयातः। तेन स तत्र न दृष्टो न तु हेतुर्लिप्यभावे सः ।।29।।
श्रुतिशब्दोऽपि तु मंत्रे मंत्रपरत्वेन न क्वचिदृष्टः।
अथ मन्यसे तु मंत्रे श्रुतिशब्दं तद्वदिह विद्यात् ।।30।।
अथवा दृश्यत एव तु वेदे लिखनार्थशब्दोऽपि।
लेखन्याश्च लिपेरपि सत्त्वं शक्यं ततो ज्ञातुम् ।।315।।
यजुषश्च संहितायाः पञ्चदशेऽध्याय आम्नातम्।
छन्दः क्षुरोभ्रज इति क्षुरधातुर्विलिखने दृष्टः ।।32।।
'अक्षरपंक्तिश्छन्दः, पदपंक्तिश्छन्दो विष्टारपंक्तिश्छन्दः । क्षुरोभ्रजश्छन्दः ।।33।। (इति यजुःसंहिता 15 14) कस्याञ्चिच्छाखायां तु- ''क्षुरश्छन्दः, भ्रजश्छन्दः-'' इति पृथक्त्वेनाम्नायते।।
तत्राप्यक्षरपदयोः साहचर्यादिह लोहनिर्मिता पूर्वयुगीया लेखन्येव क्षुरः संभाव्यते । पुरायुगे सूक्ष्मखनित्रेणैव सूच्याकारेणाक्षरलिपेः क्रियायाः संभाव्यमानत्वात्। भ्रजइति पत्रोल्लिखिता प्रकाशमानावागेव स्यात्।
अक्षरपंक्तिवर्णः पदपतिः स्यात् पदैर्यथा वाक्यैः ।
विष्टारपंक्तिरेवं क्षुरोभ्रजो लिपिकृतं मन्ये ।।34।।
क्षुरसा लेखन्या या लिखनाद् भ्राजेत दृश्येत ।
लिपिरेव सा तु वाक् स्याच्छन्दस्तच्च क्षुरोभ्रजो नाम ।।35।। छन्दः सर्व वाङ्मयमक्षरपदवाक्यसाहचर्याच्च।
अक्षरलिखनादन्यद् विलिखनमिह नोपपद्येत ।।36।।
मन्त्रनिर्माणकाले लिपिसत्त्वे वैदिकं द्वितीयं प्रमाणम्
अन्यच्च तत्र काले लिपिसत्त्वेऽस्ति प्रमाणमत्रैव।
विद्यासूक्ते वक्ति हि बृहस्पतिदर्शनं वाचाम् ।।37।।
'उत त्वः पश्चन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम् । उतो त्वस्मै तन्वं वि सो जायेव पत्य शती सुवासाः' ।।38।।
(ऋसं. 107114)
वाचामुच्चरितानां श्रवणं नु यथा तथैव लिखितानाम्।
वाचां ग्रन्थमयीनां दर्शनमुपपद्यतेऽर्थबोधाय ।।39।।
मूर्तिं विना च वाचं दर्शनमुपपद्यते क्वापि।
तस्माल्लिपिरिह वाचं मूर्तिरवश्यं तदाप्यासीत् ।।40।।
लिपिसंकेताविज्ञः पश्यन्न च तां ददर्श वाक्त्वेन ।
श्रृण्वन्न श्रृणोत्येतां वेत्ति न यस्त्वर्थसंकेतम् ।।41।।
वैदिकं द्वितीयं प्रमाणम इति।।
वैदिकं तृतीयं प्रमाण
अपि च पुरा देवयुगे सत्त्वे कस्याश्चिदेव देवलिपेः ।
मन्त्रकृतामाचारं वीक्षे नूनं प्रमाणतया ।।42।।
कुत्सनृपो गन्धर्वो हृतराज्यो दस्युभिः पुराकाले।
विकलश्चिन्तामापत् तं प्रति घोरः प्रगाथइत्याहुः ।।43।।
'मा चिदन्यद्विशंसत सखायो मा रिषण्यत।
इन्द्रमित्स्तोता वृषणंसचासुते मुहुरुक्था च शंसत ।।44।।
(8.1111)
प्रास्मै गायत्रमर्चत वावातुर्यः पुरन्दरः ।।45।।8।18)
* प्रगाथः काण्व आह-हे सखायः (कुत्सप्रभृतयः) अन्यत् किञ्चिदपि मा प्रस्तावयत । मा.चानेन राज्यहरणादिदुः खेनातितरां चिन्ताविह्वलितान्तरा भवत। स चासह संघीभूय सर्वे सोमोऽभिषुते सर्वकामप्रवर्षकं भगवन्तमिन्द्रमेवाश्रयत । उक्था = उक्थोक्यैश्च तमेवैकं मुहुः प्रार्थयत ।।8।।11) अपि च - अस्मै इन्द्राय गायत्रं प्राणत्राणहेतभतं प्रार्थनापत्रं प्रार्चत विशिष्यार्पयत।
याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत् पुरः।
इत्यादिष्टः कुत्सः शक्रमुपेत्येन्द्रसखःकाण्वः ।
गीतान्याह्वानार्थ न्यवेदयद् भद्रसूक्तानि ।।46।।
आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्द्धना।
येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते।।
भद्रा इन्द्रस्य रातयः ।।47।।816214)
यच्चिद्धित्वाजनाइमे नाना हवन्त ऊतये।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वाच वर्द्धनम् ।।48।।(8।13) एन्द्र याहि मत्स्व चित्रेण देव राधसा ।।
सरो न प्रास्युदरंसपीतिभिरासोमेभिरुरु स्फिरम् ।।49।।(8।1।23) एन्द्र याहि हरिभिरुप कण्वस्य सुष्टतिम्।
दिवो अमुष्य शासतो दिवं यय दिवावसो ।।50।।(8।।34।।1) कण्वानां तु न चौषां स्वर्गे गमनं श्रुतं तदा काले।
लिखितं विना नु भारतभूस्थैः शक्यं स आहवः कर्तुम् ।।51।।
तस्मादवश्यमेते विलिख्य कण्वा इमानि सूक्तानि।
इन्द्रस्यागमनार्थ कुत्सकरात् प्रेषयामासुः ।।52।।
मन्यामहे ततः प्राग् वैदिकमन्त्रावतारकालेऽपि।
आसील्लिपिप्रचारो विबुधैरुद्भावितः कुशलैः ।।53।।
मन्त्रनिर्माणकाले लिपिसत्त्वे चतुर्थ प्रमाणम्
ऋज्रावो नामासीत् पश्चिमभारते ऋषिः कश्चित्।
जरदस्त्रस्तस्याभूद्दौहित्रो ब्राह्मणद्वेषी ।।54।।
ब्राह्मणविद्वेषात् स हि तेषां ब्राह्मी लिपिं त्यक्त्वा।
विपरीतां तु खरोष्ठीलिपिमन्यां कल्पयामास ।।55।।
ब्राह्मी वामा दक्षिणमेति खरोष्ठी तु दक्षिणाद्वामम्।
शाकद्वीपेऽन्यत्र च लिपिः खरोष्ठी प्रचलिताभूत् ।।56।।
अस्याः पुनः खरोष्ठया विकारतोऽनेकलिपयः स्युः ।
विपरीता चरणादथ जरदस्त्रमतानुगा मगाः ख्याताः ।।57।। शाकद्वीपिमगा इह पणिभिः सह भारतेऽभ्येत्य।।
कीकटदेशे न्यषस्तं देशं मगधमाचख्युः ।।58।।
तेषां प्रसङ्गतस्त्विह लिपिः खरोष्ठी समागता मगधे।।
ब्राह्मी लिपिरासीत् प्राक् तेन द्विविधा लिपिः प्रचरिताऽत्र ।।59।। ब्राङ्या बह्वयो विकृतय आसन् खरोष्ठयाश्च ।
ता अपि वामादक्षिणमथ वाम दक्षिणादायन् ।।60।।
मगधे पाटलिपुत्रे बभूव सम्राङशोकः प्राक्।
स लिपी उभयविधे अपि निजराष्ट्र वर्तयमास ।।61।।
इत्थं द्विविधो लेखो वामावर्ती च दक्षिणावर्ती।
अद्यावधि प्रचरितो लोके सर्वत्र दृश्यते प्रायः ।।62।।
वामावर्तिन्यास्त्विह जरदस्त्रो जन्मदो लिप्याः।
ब्राह्मीलिपेर्विरोधादेष च भिन्नक्रमं लिपौ चक्रे ।।63।।
तेन स्पष्टं सिध्यति जरदस्त्रस्यास्य जन्मतः पूर्वम्।
ब्राह्मी लिपिः प्रचरिता सर्वत्रासीत् पुराकालात्।।64।।

**पञ्चमं प्रामाणम्**

परिपूर्णसभ्यतायां वृत्तायां निर्मिता इमाः श्रुतयः।
वैज्ञानिकता ह्येषां दृश्यत इह सभ्यतामूलम् ।।65।।
राजप्रजाविभागः सामाजिकता च धर्मनीतिश्च।
कार्याकार्यविभागो दृश्यत इह सभ्यताचिह्नम् ।।66।।
कालेऽनादौ लक्षाधिकेषु वर्षेष्वतीतेषु।
वेदा इमेऽवतीर्णा बहुषु च शास्त्रेष्वतीतेषु ।।67।।
पूर्वे साध्या देवाः पूर्व्या धर्माश्च पूर्वजा गाथाः ।
पूर्वाण्याख्यानान्यपि बहुधोल्लिख्यन्त इह वेदे ।।68।।
तस्मादेभ्यो वेदग्रन्थेभ्योऽपि च पुरातने काले।
उन्नत्यवनतिपर्यायधारा लोकेऽवगम्यन्ते ।।69।।
एतद्वेदात् प्रागपि बढ्यो विद्या अनेकधा भाषाः ।
नाना लिपयो जाताः संभाव्यन्ते विलुप्ताश्च ।।70।।
प्रकृतिक्रमानभिज्ञाः सहस्रषटकान्तरार्थमात्रदृशः । कालविलुप्तानान्नाभ्युपगच्छन्त्यदर्शनाद्धेतोः ।।71।।
अद्यत्वे त्विह वाङ्मयमुपलब्धं यावदेवास्ति।
सर्वस्मादपि तस्माद्वेदः प्राचीन इति सत्यम् ।।72।।
वेदात्प्रागपि विद्या भाषा लिपयोऽनुवृत्ताश्चेत्।।
ध्रूवमत्र वेदकालेऽप्येता आसन्निति ब्रूमः ।।73।।

**षष्ठं प्रमाणम्**

यास्कोऽप्याह निरुक्ते (11615) धर्मान् दृष्टवर्षयः पुराऽनूचुः । श्रुत्वा मन्त्रग्रहणाक्षमा इमं ग्रन्थमामम्नुः ।।74।।
बिल्मो विभिन्नखण्डो बिल्मग्रहणाय कल्पितो ग्रन्थः ।
लिपिमन्तरेण भिन्नो भिन्नः खण्डो न शक्यमभिनेतुम् ।।75।।
सप्तमं प्रमाणम् द्वैपायनश्च कृष्णो हिमवति बदरीवने निवसन्। वेदं व्यस्यन् मन्त्रान्संगृह्य तु संहिताश्चक्रे ।।76।।
मन्त्राणां संकलनं तेषां चानेकसंहितारचनम्।
लिपिमन्तरेण कर्तुं न शक्यमेकेन पुरुषेण ।।77।।

**अष्टमं प्रमाणम्**

साहसिकः पुनरन्यस्त्वदूरदर्शीत्यदीर्घदर्शीति।
मागधराजाशोकात् प्राग् लिपिसत्त्वं न भावयति ।।78।।
हन्ताशोकस्य द्वाविंशतिशतकल्पवर्षाणि ।।(2250)
प्रययुः किन्त्विहरामः पञ्चसहस्राब्दतोऽभवत्पूर्वम् ।।79।।
रामस्यापि च समये लिपिरासीदिति पुरा हनुमान् ।
नामाङ्किताङ्गुलीयकमदर्शयत् तत्र जानक्यै ।।80।।
'वानरोऽहं महाभागे दूतो रामस्य धीमतः ।
रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्' ।।81।।
(वाल्मी.सु.36 ।।2)
चीनपरिवाडासीदित्यङ्गस्तद्वचः प्रमाणं ये।
भारतविद्वच्छास्त्रं तु न प्रमाणं वदन्ति ते धन्याः ।।82।।
मन्त्रनिर्माणकाले विद्यमानाया लिपोह्मीसंज्ञा।
इत्थं च वेदकाले लिपिसत्त्वे सन्ति हेतवः कतिचित्।
साच लिपिाह्मी वा दैवी वा नामतोन्यावा।।83।।